
BIBLIOTHECA INDICA:
A
A COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL
NEW SERIES, No. 1370.

मुग्धबोधं व्याकरणम्।



MUGDHABODHA VYAKARANA

OR

A treatise on Sanskrit Grammar.

BY

VOPADEVA

With the commentary of Rama Tarkavagisha.

EDITED WITH NOTES BY

SIVA NARAYAN SIROMANI
LATE PROFESSOR, SANSKRIT COLLEGE, CALCUTTA.
AND
AJITA NATH NYAYARATNA.

VOL. I. FASC. VII.

Calcutta,
PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 5, Nandakumar Chawdhury's 2nd Lane.
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1913.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.		
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 ; Vol. II, Fasc. 1–5 ; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–8 @ /10/ each		12	6
Aitereya Lochana.		2	0
Amarkosha, Fasc. 1		2	0
Anu Bhāshya, Fasc. 2–5 @ /10/ each		2	8
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-		1	4
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1–6 @ /10/ each		3	2
Atmatattaviveka, Fasc. I.		0	1
Açvavaidyaka, Fasc. 1–5 @ /10/ each		3	
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–10 ; Vol. II. Fasc. 1–10 @ 1/ each		20	
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol II, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-5 @ /10/ each		5	0
Bhāsavritty		0	10
Bhātta Dipikā Vol. I, Fasc. 1–6 ; Vol. 2, Fasc. 1, @ /10 each		4	6
Bauddhastotrasangraha		2	0
Bṛhaddēvatā Fasc. 1–4 @ /10/ each		2	8
Bṛhaddharma Purāṇa Fasc 1–6 @ /10/ each		3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each		3	12
Cri Cantinatha Charita, Fasc. 1-3		1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1–7, Vol II, Fasc. I–5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each		3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/		3	2
Ditto Vol. IX. Fasc. 1–2		1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1–17 @ /10/ each... ...		10	10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1–25 ; Vol. III. Part I, Fasc. 1–18. Part II, Fasc. 1–10. Vol. IV. Fasc. 1-6 @ /10/ each		36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each		2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/		1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each		8	12
*Çrauta Sūtra of Çāṅkhāyana, Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–4 ; Vol. III, Fasc. 1–4 : Vol 4. Fasc. 1 @ /10/ each		10	0
Çrī Bhāshyam, Fasc. 1–3 @ /10/ each		1	14
Dāna Kriyā Kaumudī, Fasc. 1–2 @ /10/ each		1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1–7 @ /10/ each		4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each		3	2
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each		3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each		2	8
Ditto (Appendix) Gobhila Parisista		2	0
Ditto Grihya Sangraha		0	10
Haralata		1	14
Karmapradīph, Fasc. I.		1	4
Kāla Viveka, Fasc. 1–7 @ /10/ each		4	
Kātantra. Fasc. 1–6 @ /12/ each		4	
*Kūrma Purāṇa, Fasc. 3–9 @ /10/ each		5	1
Kiranavali, Fasc. 1–2 @ /10/ each		1	
Madana Pārijāta, Fasc. 1–11 @ /10/ each		6	1
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1–9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each		19	6
Ditto Vol. IV, fasc. 1 @ 1/4		2	8
Manuṭīkā Sangraha, Fasc. 1–3 @ /10/ each		1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–9 @ 1/- each		9	0
*Mīmāṁsā Darçana, Fasc. 10–19 @ /10/ each		6	4
*Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each		2	8

146896

ऋतभागश्च किन्दासो व्ययस्कार्कान्धका अपि ।
महाकुलः पृदाकुश्च निषादोऽथ परस्त्रियाः—
परशुष्टे, गोपवनः शिग्रु-भामज-विन्दवः ।
अश्वावतार-श्यामाक-श्यापर्णाः समुदीरिताः ॥

अत्र ये शब्दा अनृषिवाचकास्तेभ्योऽनन्तरापत्य एव ट्टुः । अतएव पौत्रः पौनर्भवः दौहित्र इत्यादि । ननु कथं कुशिकस्यानन्तरापत्यं कौशिको विश्वामित्रः, कथं वा व्यवहितापत्ये इन्द्रह्नर्नाम सप्तमः काश्यपानाम् ब्वेऽलुक् ? इति (१) चेत् सत्यं, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति न्यायात् ऋषिष्णेन (२) भवितव्यम्, अथवा तस्येदमित्यर्थे ष्णेन । परस्त्रिया अपत्यं पारश्वः, ट्टे परश्वादेशः । अत्र परस्त्रीशब्देन भिन्नजातीया स्त्री वाच्या, अतएव पारशवो विदुरः । तथाच—पारशवः पुमान्, परस्त्रीतनये शस्त्रे द्विजाच्छूद्रासुतेऽपि च इति मेदिनीकारः । अर्थान्तरे तु पारस्त्रैणेयः । बाह्वादेराकृतिगणत्वात् विदस्यान्तरापत्यं वैदिरित्यादौ ष्णिः, न तु ऋषिष्णः । यद्यपि शिवादित्वात् ष्णे कृते वैद इत्यादि सिद्धति, तथापि विदादेः पृथक् ट्टुविधानं मयड्बाधनार्थम् ।

---

(१) काश्यपानामित्यत्र कश्यपशब्दस्य विदादिपाठात् विदादेर्गोत्रे इति वार्त्तिकसूत्रेण बहुवचनविहितस्य ट्टुप्रत्ययस्य वक्ष्यमाणगर्गयस्कविदादीत्यादिसूत्रेण कथं न लुग्भवतीत्याशङ्क्याह क्वचिदित्यादि । गर्गयस्केत्यादिसूत्रे तर्कवागीशेन विदादेः परस्य ट्टुप्रत्ययस्यैव लुग्भवतीति वक्ष्यते । अत्र तु ऋषिष्णेन इदमर्थष्णेन वा साधितत्वाच्च लुगित्यर्थः ।

(२) शिवादित्वादिति शेषः ।

उत्सादेश्च । उत्सादेष्टुः स्यात्, पृथग्योगादपत्यसामान्ये । उत्सस्यापत्यम् औत्सः, जानपद इत्यादि ।

उत्सादिर्यत्र—

उत्सो जनपदविनदौ धन्वा, विकच-महानद-तरुणं धेनुः ।
भरत-महानस-पृथिवी-देवं, पङ्क्तिर्जगती कुरु-पञ्चालम् ॥
उदपान-महाप्राण-ककुभस्तलुनो महान् ।
इन्द्रावसान-विकर-त्रिष्टुवुष्णिगनुष्टुभः ॥
उशीनरः सुवर्णश्च भल्लकीयो रथन्तरः ।
बृहन्मध्यन्दिनश्चाथ सत्वतो नुण् भवेदिह ॥
उदस्थानन्तु देशेऽस-वक्कयो(१)ऽंशे वृषन्मतः (२) ।
ग्रीष्मोऽवृत्ते समाख्यातः शेषं ज्ञेयं प्रयोगतः ॥

इह कुरुशब्दस्य पाठात् कुरोरपत्यम् इत्यर्थे कौरव इति जयादित्यः । सत्वत्शब्दो वत्वन्तस्तस्य टे नुण्, सत्वतोऽपत्यं सात्वन्तः । पाठबलात् उदस्थाने भव औदस्थानो देशः । अदेशे तु उदस्थानः कश्चित् तस्यापत्यम् औदस्थानिः । वृषदृशब्दोऽंशे वाच्ये टेः वार्षदः, अनंशे तु वार्षदः ष्णः । ननु ष्णटोः को विशेष इति चेत् सत्यं, ष्णान्तवार्षदस्य सङ्घे वार्षदकः । टान्तस्य तु वार्षद इति विशेषः । अवृत्त इति—वृत्तं छन्दः, न वृत्तम् अवृत्तं तस्मिन्, ग्रैष्मः । अवृत्त इति किं ? ग्रैष्मी त्रिष्टुविति ऋतुनक्षत्रादिति ष्णः, तस्मादिकारे मयट् ग्रैष्ममयं, टान्तादिकारे ग्रैष्मिमिति विशेषः ।

---

(१) अंशे अवयवे वक्कयः । (२) पाणिनीये वृषदित्यत्र पृषदिति पाठः ।

४२६ । सङ्घासम्भद्रान्मातुर्ङुर् ष्णे ।

(सङ्घा-सं-भद्रात् ५।, मातुः ६।, ङुर् ।१।, ष्णे ७) ।

द्वैमातुरः ।

४२७ । नन् पुंस्त्रियोः । (नन् ।१।, पुंस्त्रियोः ६॥) ।

पौंस्नः स्त्रैणः ।

४२८ । कुञ्जादेर्णायन्योऽस्त्रीब्वेऽपत्ये ।

कुञ्जादेः ५।, णायन्यः १।, अस्त्रीब्वे ७।, अपत्ये ७।) ।

कुञ्जादेरपत्यार्थे णायन्यः स्यात्, न तु स्त्रियां, न च ब्वे ।

कौञ्जायन्यः ब्राह्मायन्यः । स्त्रीब्वे तु कौञ्जायनी कौञ्जायनाः ।

---

४२६ । संख्या च सम् च भद्रश्च तत्तस्मात् । संख्यावाचकात् समो भद्राच्च परस्य मातृशब्दस्य ङुर् स्यात् ष्णे, ङित्त्वादन्त्यस्य । सौत्रत्वान्न विः । द्वैमातुर इति—द्वयोर्म्मात्रोरपत्यमिति वाक्यं, शेषात् ष्णः, एवं षाण्मातुरः ।

४२७ । नन् । पुमांश्च स्त्री च ते तयोः । अनयोर्नन् स्यात् ष्णे ।

४२८ । कुञ्जादेः । स्त्री च ब्वं च स्त्रीब्वं, न स्त्रीब्वम् अस्त्रीब्वं तस्मिन् । अपत्यग्रहणं, पूर्व्वत्र सामान्यविधानात् । अयं (१) नड़ाद्यन्तर्गणः णायन्येन ष्णायनो बाध्यते, तेनानन्तरापत्ये कौञ्जिः । कौञ्जायन्य इति—कुञ्जस्यान्तरापत्यमिति वाक्यम् । एवं ब्राह्मायन्यः ।

---

(१) अयं कुञ्जादिः ।

कुञ्जादिर्यथा—

कुञ्जो नग्नो वुधो लोम-भस्म-शङ्खाः शठो गणः ।
शाकः शुभ्रा विपाशा च शुण्डा स्तम्भः प्रकीर्त्तितः ॥
तिकादेर्णायनिर्वृषादेस्तु यम् च ।

तिकादेरपत्ये णायनिः स्यात्, वृषादेस्तु णायनेर्यम् च, म द्वत् । तिकस्यापत्यं तैकायनिः, कितवस्यापत्यं कैतवायनिः ।

तिकादिर्यथा—

तिक-कितवौरस-तैतिल-नीड़,
भौरिकि भौलिकि-बन्ध्यारब्धम् ।
चौपयतः कुरु-संज्ञा यज्ञं
गङ्गा लाङ्गट-शूद्र यमुन्दम् ।
खल्यका लोमको रूप्य-ग्राम्य-ध्वाजयता उरः ।
शाट्या वालशिखा वैङ्कयतः शैकयतस्तथा ॥
चैटयतः स्वग्रामोऽथ कौरव्यः चत्रिये मतः ।
गोकच्यश्चन्द्रमाः चैतयतो रचान्तदा मताः ॥
द्वयचः षाान्ता देवरथोऽमित्रोदन्यं (१) प्रकीर्त्तितम् ।

चत्रियार्थ-कौरव्यः पठ्यते (२), तेन जनपद-ष्यान्तस्य ग्रहणं न तु कुर्व्वादि-ष्यान्तस्य, स तु ब्राह्मणवचनस्तस्मात् षोर्लुगेव । जनपद-ष्यान्तात्तु कुरोरपत्यं युवा कौरव्यायणिः चत्रियः । रचान्तात्तावत्—गोरचस्यापत्यं गौरचायणिः, आश्वरचायणिरित्यादि । द्वयचः षाान्तात्तावत्—कर्त्तुरपत्यं कार्त्तः, तस्यापत्यं

---

(१) अमित्र. उदन्य । (२) ऽह कुरुगब्देनेति शेषः ।

कार्त्तायणिः। अन्यत्र कर्त्तृशब्दो ब्राह्मणवचनः, तेनात्र अब्राह्मणात् णायनेर्न लुक्। एवं कौशायनिः, शैवायनिः। ह्राच्च इति किम्? औपगविः, अतः ष्णिः।

ह्रषादिर्यथा—ह्रष दगु कोशल छाग कर्म्मारः।

ह्रषादेस्तावत्—वार्ष्यायणिः दागव्यायनिः कार्म्मार्य्यायणिः, कुर्व्वादित्वात् कार्म्मार्य्यः। कोशलशब्दोऽत्र जनपदवचनः। ननु कथं कौशल्यायनिवल्लभामिति भट्टिः। उच्यते—नृजातेरित इति ईपि कौशल्यायनी, तस्या अपत्यं युवा इत्यर्थे आबादित्वात् ष्णेयस्तस्य लुकं विधाय स्त्रीत्यस्य लुकि कौशल्यायनिरिति परे। वस्तुतस्तु तिकादेराकृतिगणत्वात् णायनिरिति। तथा च कौशल्यकार्म्मार्य्याभ्यां चेति पाणिनिसूत्रम्।

ह्रद्वादनपत्यान्ताद्वा पुत्रान्ताद्वाकिनादेस्तु कंश्च। अनपत्यान्ताद्ह्रदसंज्ञकात् णायनिर्व्वा स्यात्, पुत्रान्तात् वाकिनादिभ्यश्च, तेषां तु कन् च स्यात् न ह्रत्। आम्रगुप्तस्यापत्यम् आम्रगुप्तायनिः नापितायनिः। एवं त्यादायनिः, तवापत्यं त्वादायनिः, युवयोर्युष्माकं वा अपत्यं यौष्मदायनिः। कथं भावतायनिः? वाशब्दस्य व्यवस्थावाचित्वात्। पक्षे आम्रगुप्तिः नापितिः त्यादस्तस्यापत्यं युवा त्यादायनिः। ह्रद्वादिति किं? दैवदत्तिः यज्ञदत्तिः औपगवः। अनपत्यादिति किम्? औपगविः। पुत्रान्तात्—गार्गीपुत्रकायणिः। गार्गीपुत्रायणिरिति पूर्व्वेणैव सिद्धे कन्विधानार्थः पाठः, णायन्यभावपक्षे गार्गीपुत्रिरिति रूपत्रयम्। वाकिनादेस्तावत्—वाकिनकायनिः वाकिनायनिः वाकिनिः।

उत्सादेश्च । उत्सादेष्टुः स्यात्, पृथग्योगादपत्यसामान्ये । उत्सस्यापत्यम् औत्सः, जानपद इत्यादि ।

उत्सादिर्यत्र—

उत्सो जनपदविनदौ धन्वा, विकच-महानद-तरुणं धेनुः ।
भरत-महानस-पृथिवी-देवं, पङ्क्तिर्जगती कुरु-पञ्चालम् ॥
उदपान-महाप्राण-ककुभस्तलुनो महान् ।
इन्द्रावसान-विकर-त्रिष्टुवुष्णिगनुष्टुभः ॥
उशीनरः सुवर्णश्च भल्लकीयो रथन्तरः ।
बृहन्मध्यन्दिनश्चाथ सत्वतो नुण् भवेदिह ॥
उदस्थानन्तु देशेऽस-वक्यो(१)ऽंशे वृषन्मतः (२) ।
ग्रैष्मोऽवृत्ते समाख्यातः शेषं ज्ञेयं प्रयोगतः ॥

इह कुरुशब्दस्य पाठात् कुरोरपत्यम् इत्यर्थे कौरव इति जयादित्यः । सत्वत्शब्दो वत्वन्तस्तस्य टेः नुण्, सत्वतोऽपत्यं सात्वन्तः । पाठबलात् उदस्थाने भव औदस्थानो देशः । अदेशे तु उदस्थानः कश्चित् तस्यापत्यम् औदस्थानिः । वृषदृशब्दोऽंशे वाच्ये टेः वार्षदः, अनंशे तु वार्षदः ष्णः । ननु ष्णट्वयोः को विशेष इति चेत् सत्यं, ष्णान्तवार्षदस्य सङ्घे वार्षदकः । टान्तस्य तु वार्षद इति विशेषः । अवृत्त इति—वृत्तं छन्दः, न वृत्तम् अवृत्तं तस्मिन्, ग्रैष्मः । अवृत्त इति किं ? ग्रैष्मी त्रिष्टुबिति ऋतुनक्षत्रादिति ष्णः, तस्माद्विकारे मयट् ग्रैष्ममयं, टान्ताद्विकारे ग्रैष्ममिति विशेषः ।

---

(१) अंशे अंशमात्रे वक्यः । (२) पाणिनीये वृषदित्यत्र वृष्यादिति पाठः ।

दुर्मंहड्ग्रां णेयक-णीनौ वा। आभ्यां परात् कुलात् णेयक-णीनौ क्रमाद्वा स्याताम्। दौष्कुलेयकः, अत्रादित्वात् दौष्कुलेयः; पक्षे दपूर्व्वत्वात् दुष्कुलीनः। माहाकुलीनः, उत्सादित्वात् माहाकुलः पक्षे महाकुलीनः।

क्षत्रादियो जातौ। क्षत्रशब्दाज्जातावपत्ये इयः स्यात्। क्षत्रियः जातिः। जाताविति किम्? क्षात्रिः।

सौवीरगोत्रात् फाण्टाहृति मिमतात् ण-णायनौ। सौवीरगोत्रात् फाण्टाहृतेर्मिमताच्च ण-णायनौ स्याताम्। फाण्टाहृतेरपत्यं युवा फाण्टाहृतः। सौवीरगोत्रत्वात् यून्यस्य विषयः, फाण्टाहृतायनिः। एवं मिमतस्यापत्यं मैमतः मैमतायनिः। परे तु अल्पाच्तरस्य व्युत्क्रमनिर्देशात् (१) यथासंख्यमिच्छन्ति, तन्मते फाण्टाहृतः मैमतायनिरित्येव। सौवीरगोत्रादिति किम्? फाण्टाहृतायनः मैमतायनः।

देवपृथिवीभ्यां ण्यणौ वा। आभ्यां क्रमेण ण्य-णौ वा स्याताम-पत्ये। देवस्यापत्यं दैव्यः, पृथिव्या अपत्यं पार्थिवः, स्त्रियां दैव्या पार्थिवा, उत्सादित्वात् दैवः पार्थिवः, दैवी पार्थिवी।

श्यामान्तादो लोमान्तात्तु ब्वे। श्यामन् इत्यन्तादः स्यात्, लोमान्तात्तु ब्वे। अश्वत्थामा नाम कश्चित्, तस्यापत्यम् अश्वत्थामः उडुलोम्नोऽपत्यानि उडुलोमाः। ब्वे किम्? औडुलोमिः औडुलोमी।

---

(१) सूत्रे मिमतफाण्टाहृतेरित्यनुक्त्वा फाण्टाहृतिमिमतादित्युक्तेरित्यर्थः।

रूढ़ाद्राज्ञि च टुः, ण्तु द्रगड्-मगध-कलिङ्ग-शूरमसात्। अपत्ये राज्ञि च देशतुल्याख्यक्षत्रियात् टुः स्यात्, द्रगड्-मगधादेस्तु ण्। पञ्चालानामपत्यं राजा वा इत्यर्थे पाञ्चालः, वैदेहः। द्रगजादेस्तु आङ्गः वाङ्गः सौह्मः मागधः कालिङ्गः शौरमसः। रूढ़ादिति किम्? पञ्चालस्य ब्राह्मणस्यापत्यं पाञ्चालिः।

द्वङेल्कोशलाजादादगान्धारि-शाल्वेयात् ण्यङ्। गान्धारिशाल्वेयभिन्नात् द्वङादिकारान्तात् कोशलादजादाच्चापत्ये राजनि च ण्यङ् स्यात्। टुण्योरपवादः। द्वङात्—आम्बष्ठस्यापत्यं राजा वा आम्बष्ठ्यः, सौवीरस्यापत्यं राजा वा सौवीर्य्यः। इकारान्तात्—कुन्तेर्जनपदक्षत्रियस्यापत्यं राजा वा कौन्त्यः, अवन्तेरावन्त्यः, कोशलस्य कौशल्यः, अजादस्य आजाद्यः, स्त्रियामजादित्वादाप्, आम्बष्ठ्या कौशल्या आजाद्या। कौन्त्यावन्त्ययोस्तु कुन्ती अवन्ती। कुरुकुन्त्यवन्तिभ्योऽपत्य त्यस्य लुकि नृजातेरित इति ईप्। ङित्त्वात् पतिपुत्रादौ यङ ई, आम्बष्ठीपतिः आम्बष्ठीपुत्र इत्यादि। गान्धारि-शाल्वेयात्तु गान्धारः शाल्वेयः, पूर्व्वेण टुः।

कुरुन्यादिभ्यो ण्यः पाण्डोर्डिच्च। कुरोर्निपूर्व्वशब्देभ्यो जनपदेभ्यो ण्यः स्यात् अपत्ये राज्ञि च, डिच्च पाण्डोः। कुरोर्जनपदस्यापत्यं राजा वा कौरव्यः, कथं माघे—"कुकुरकौरवस्त्रियः," तथा वेणीसंहारे—"संरक्ष्यतां कौरवा" इति? उच्यते—जनपदाविवक्षायां, विषयो देश इत्यर्थे ण्ये वा (१) तस्येदमित्यर्थे

---

(१) विकारसङ्केति सूत्रस्य टीकायां सङ्घाधिकारात् परं "विषये देशे" इति वार्त्तिकसूत्रं द्रष्टव्यम्।

४२९ । गर्ग यस्क विदादि भृग्वत्रि कुत्साङ्गिरो वशिष्ठ गोतम रूढ़ाल्लुग् ब्वेऽस्त्रियाम् ।

(गर्ग—रूढ़ात् ५।, लुक् ।१।, ब्वे ७।, अस्त्रियां ७।) ।

वा । कथमत्रत्रिये "कौरव्याः पशव" इति ? उपचारात् । न्यादेः—निधनस्यापत्यं राजा वा नैधन्यः नैपुण्यः नैषध्यः । पाण्डोर्जनपदस्य क्षत्रियस्यापत्यं राजा वा पाण्ड्यः, डिति टिलोपः । रूढ़ इति किं ? महाभारते पाण्डोरपत्यं पाण्डवः । न हि तत्र पाण्डुर्देशः ।

उडुम्बरादेः (१) ण्यिः । रूढ़ादपत्ये राज्ञि चेति । ट्युस्य बाधकः । उडुम्बरस्य जनपदस्य क्षत्रियस्यापत्यं राजा वा औडुम्बरिः तैलखलिः ।

उडुम्बरस्तिलखलो मद्रकारो युगन्धरः ।
भूलिङ्गः शरदण्डश्च कलकूटोऽश्वकस्तथा ।
प्रत्यग्रथो नव प्रोक्ताः परे शिष्टप्रयोगतः ॥

केकय-प्रलय-मित्रयूनां णित्ते यादेरियः । एषां यादेर्भागस्य णित्ते इयादेशः स्यात् । केकयस्यापत्यं कैकेयः, प्रलयादागतं प्रालेयं हिमं, मित्रयोर्भावः मैत्रेयिका, गोचचरणासकः ।

४२९ । गर्ग । गर्गश्च यस्कश्च विदश्च ते आदयो येषां ते गर्गयस्कविदादयः, ते च भृगुश्च अत्रिश्च कुत्सश्च अङ्गिराश्च वशिष्ठश्च

---

(१) उडुम्बरादेरित्यपि पाठः ।

देशतुल्याख्यः क्षत्रियो रूढः । एभ्यः परेषामुक्तानां त्यानां ब्वे विहितानां लुक् स्यात्, न तु स्त्रियाम् ।

गर्गाः वत्साः, यस्काः लज्जाः, विदाः उर्व्वाः, भृगवः अत्रयः कुत्साः अङ्गिरसः वशिष्ठाः गोतमाः, अङ्गाः वङ्गाः कलिङ्गाः । स्त्रियान्तु भार्गव्यः ।

गोतमश्च रूढश्च तत्तस्मात् । रूढशब्दस्य व्युत्पत्तिमाह देशतुल्याख्य इत्यादि । तथाच गर्गादि-ण्यः, यस्कादि-ण्य-ण्यायनष्यि-ण्येयाः, विदादि-ट्ञः, अत्रि-ण्येयः, भृगुकुत्साङ्गिरोवशिष्ठगोतमण्यः, रूढ-ण्यञ् ट्ञ ण्यङ् एय ष्यि इत्येषां ब्वे लुगित्यर्थः । क्रमेणोदाहरति गर्गा इत्यादि । क्षत्रियोस्तु गार्ग्यः गार्ग्यौ, यास्कः यास्कौ, वैदः वैदौ, आत्रेयः आत्रेयौ, भार्गवः भार्गवौ, कौत्सः कौत्सौ, आङ्गिरसः आङ्गिरसौ, वाशिष्ठः वाशिष्ठौ, गौतमः गौतमौ, आङ्गः आङ्गौ इत्यादि । एवं ब्वे लुकि सै गर्गाणां धनं गर्गधनम् अङ्गधनमित्यादि । ब्वे विहितानां त्यानामिति किम् ? गार्ग्यश्च वात्स्यश्च आग्निवेश्यश्च ते गार्ग्यवात्स्याग्निवेश्याः । एवं गार्ग्यौ च वात्स्यौ च आग्निवेश्यौ च ते गार्ग्यवात्स्याग्निवेश्या इत्यादौ लुग् न स्यात् । परैकदेशिनस्तु एकवचनान्तानामपि द्वन्द्वसमासार्थवाक्ये समासे एकार्थाभावात् सहभावविवक्षायां बहुत्वे लुगित्याहुः । तेन गर्गवत्साग्निवेश इति उदाजह्रुः, प्रियवाङ्ग इति प्रत्युदाजह्रुरिति । गर्गविदादी उक्तौ ।

यस्कादिर्यथा—

यस्को लह्य-तच्चाऽयस्थूण-भलन्दन-तृणकर्णाः (१) ।
भण्डित भड़ित-खरपा भण्डिल-भड़िली सदामत्तः ।
क्रोष्टुमायो वह्नियोंगः कम्बलहार-कर्षकौ ।
क्रोष्टुमानो विषपुटोपरिमेखल-पादकाः (२) ।
कर्णाटकः क्रोष्टुपादस्तथा कटुकमन्यकौ (३) ।
वकसक्थः शीर्षमायः पिण्डीजङ्घस्तथैव च ।
जङ्घारथ-शीर्षमान-लज्जा रज्जोऽसुरस्तथा ।
उरकाश्मोऽजवस्तिश्च विशिः कुद्रिरिमे त्रयः ॥

यस्कादयः षट् शिवादयः, भण्डितादयः पञ्च नड़ादयः, अजवस्त्यादयस्त्रयः अत्रादयः । शेषाणामदन्तत्वात् ष्णिः । यस्का देराकृतिगणत्वात् पुष्करसच्छब्दोऽपि, तेन पौष्करसादिः पौष्करसादौ, व्वे पुष्करसदः ।

बह्वचो गोत्रस्य प्राच्यभरतेषु । बह्वचः शब्दात् प्राच्य-भरत-गोत्रविहितस्य त्यस्य लुक् स्यात् व्वे । प्राच्यगोत्रे—पन्नागारस्यान्तरापत्यं पान्नागारिः पान्नागारी, व्वे पन्नागाराः । भरतगोत्रे—यौधिष्ठिरिः यौधिष्ठिरी युधिष्ठिराः । एवमार्ज्जुनिः आर्ज्जुनी अर्ज्जुनाः । बह्वच इति किम् ? भैमिः भैमी भैमयः ।

अगस्त्यकुण्डिन्योरगस्तिकुण्डिनौ च । आभ्यां गोत्रत्यस्य व्वे

---

(१) लह्य इत्यत्र लच्च इति च पाठान्तरम् ।
(२) विषपुट, उपरिमेखल । पादक इत्यत्र पदक इत्यपि पाठः ।
(३) कटुक इत्यत्र वटुक इत्यपि पाठः ।

लुक् स्यात्, लुकि सति अगस्त्य-कुण्डिन्योरगस्तिकुण्डिनावादेशौ क्रमात् स्तः। अगस्त्यस्यान्तरापत्यम् ऋषि-ण्यः आगस्त्यः, आगस्त्यौ व्वे अगस्तयः। कुण्डिन्या अपत्यं गर्गादित्वात् ण्यः कौण्डिन्यः कौण्डिन्यौ व्वे कुण्डिनाः।

तिककितवादेश्चे। तिकादेः कितवादेश्च परस्य गोत्रविहितस्य ल्यस्य चे लुक् स्यात् व्वे। तैकायनयश्च कैतवायनयश्च ते तिककितवाः। उपकलमकाः उलूककुभाः उरसलङ्कटाः अग्निवेशदासेरकाः वङ्गुरभण्डीरथाः पफकनरकाः वक्रनखगुदपरिणद्धाः लङ्कशान्तमुखाः कृष्णाजिनकृष्णसुन्दराः भ्रष्टककपिष्ठलाः इत्यादि। चे किं? तैकायनयः कैतवायनयः। व्वे किं? तैकायनिश्च कैतवायनिश्च तैकायनिकैतवायनी।

उपकादिभ्यो वाऽञ्चे च। उपकादिभ्यो व्वे विहितस्य गोत्रल्यस्य अञ्चे चे च व्वे लुक् स्याद्वा। उपकाः औपकायनाः, लमकाः लामकायनाः। उपकलमकाः औपकायनलामकायनाः। व्वे किम्? औपकायनश्च लामकायनौ च औपकायनलामकायनाः। उपकादिर्यथा—

उपक-लमक-सुपिष्ट-मयूरं जटिलक-वधिरक-हृष्णिक-कर्णम्।
पिष्ट-कपिष्ठल-खारीजङ्घाऽनुजक-गलाखल-कलसीकण्ठम्॥
कासक्तन्त्रो निदाघश्च मन्दकः कृष्णसुन्दरः।
कृष्णाजिनोऽवतारश्च भ्रष्टकः कृष्णपिङ्गलः॥
उलूक-दामकण्ठौ चाऽवटावक-कुपीतकौ।
अनुलोमाऽनभिहितः प्रतानोऽजपथस्तथा॥

उपकलमकौ नड़ादौ, सुपिष्टादयः सप्त शिवादयः, अनुलोमन् वाह्वादिः, शेषाणामदन्तत्वात् ष्णिप्राप्तिः ।

गर्गविदादयः कद्वयोः षे । गर्गादेर्विदादेश्च षे वर्त्तमानस्य कद्वयोर्विहितस्य त्यस्य लुक् स्याद्वा ।

गार्ग्यस्य गार्ग्ययोर्वा धनं गर्गधनं गार्ग्यधनम्, एवं वैदस्य वेदयोर्वा धनं विदधनं वैदधनम् ।

रूढ़ात् कम्बोजादेर्नित्यम् । कम्बोजादेः रूढ़ात् उत्पन्नस्य राजापत्यार्थत्यस्य लुक् नित्यं स्यात् । कम्बोज-जनपदस्यापत्यं राजा वा कम्बोजः ।

कम्बोजादिर्यथा—

कम्बोजः केरलश्चोलः खशश्च यवनः शक इत्यादि ।

स्त्रियां कूरुकुन्त्यवन्तिभ्यः । एभ्यो राजापत्योत्पन्नत्यस्य, स्त्रियां लुक् स्यात् । कुरोर्जनपदस्यापत्यं स्त्री राज्ञी वा कुरूः, उत इत्यादिना ऊप् । एवं कुन्ती अवन्ती, ङाङो लुकि नृजातेरिति इति ईप् ।

अतश्चाप्राच्य-भर्ग-यौधेयादेः । प्राच्यगोत्र-भर्गादि-यौधेयादि-भिन्नाद्राजापत्योत्पन्नस्य अतस्यस्य (१) स्त्रियां लुक् स्यात् । शूरसेनस्यापत्यं स्त्री राज्ञी वा शूरसेनी, इड़विड़स्यापत्यं स्त्री राज्ञी वा इड़विड़ी इत्यत्र ट्वुस्य, मद्रस्यापत्यं स्त्री राज्ञी वा मद्री, दरदोऽपत्यं स्त्री राज्ञी वा दरत् इत्यत्र द्व्यचः षणस्य लुक्, लुकि ईप् मद्र-शूरसेनाभ्याम् । अत इति किं ? कौशल्या आजाद्या । अप्राच्य-भर्ग-

(१) अकारमात्रप्रत्ययस्य ।

यौधेयादेरिति किं ? पाञ्चाली वैदेही मागधी आङ्गी वाङ्गी सौह्मी-त्यादि । भर्गादेः—भार्गी कैकेयी । कथं "प्राक् कैकयीतो भरतस्ततोऽभूत्" आद्यप्रकृतिरेव ? नदादिपाठादिति भागवृत्तिः ।

भर्गादिर्यथा—

भर्गः करूशः कश्मीरः कौरव्यः सुह्मकैकयौ ।
शात्वोऽनुभवकश्चैव भर्गादिः परिकीर्त्तितः ॥

यौधेयादेः—यौधेयी शौभ्रेयीत्यादि । स्त्रियामिति चकारेणानुकर्षणान्न व्वमत्र (१) ।

न गोपवनादेः । गोपवनादेर्गोत्रत्यस्य लुङ् न स्यात् । अयं विदाद्यन्तर्गणः । गौपवनाः, गौपवनस्य गौपवनयोः कुलं गौपवनकुलमित्यादि ।

उक्तोऽपत्याधिकारः ।

ण्यो वेत्त्यादौ यमादिभ्यस्त्वपत्यवत् । स्याद्यन्ताल्लेः ण्यः स्यात् वेत्त्यादिष्वर्थेषु, यमादिभ्यस्तु अपत्यवत् त्याः स्युः । वेत्त्यादिर्यथा—

वेत्ति । अधीते । रक्तम् । युक्तः कालः । दृष्टं साम । परिहतोरथः । उद्धृतम् । संस्कृतं भक्ष्यम् । व्रतयिता । पौर्णमास्यस्मिन् । अस्य देवता । समूहः । विषयो देशोऽस्य । आदिरस्य प्रगाधे । संग्रामः । तदस्त्यस्मिन् देशे । निर्वृत्तः । निवासः । अदूरभवः । विकारः । अवयवः । भवः । व्याख्यानम् । प्रायभवः । जातः । कृतः । क्रीतः । लब्धः । कुशलः । ऋणं दृश्यते । संभूतः । साधुः । पुष्यत् ।

---

(१) अनुवर्त्तते इति शेषः ।

४३०। ढघे कात् षीककण्णीनेया श्चानितश्च।

(ढ घे ७।, कात् ५।, षीक कण् णीन इयाः १।।।, च।१।, अनितः १।।।, च।१।)।

कात् परा एते पूर्व्वे च सेतो ऽनितश्च स्युः ढे घे च वाच्ये।

पच्यमानम्। उप्तम्। देयमृणम्। मृगो व्याहरति। अस्य सोढ़म्। आगतः। प्रभवति। गच्छति। अभिनिष्क्रामति। अधिकृत्य कृतो ग्रन्थः। एकदिक्। अस्य निवासः। अस्याभिजनः। अस्य भक्तिः। गृह्यते। श्रूयते। उच्यते। प्रोक्तम्। उपज्ञातं। कृतो ग्रन्थः। इदम्।

यमादिस्तावत्—यमः आदित्यः अग्निः कलिः दितिः अदितिः पृथिवी देवः अपत्याद्यादिस्थानान्ताः उत्पादयश्च। पत्यादिर्व्यक्तः कुर्व्वादी। उदाहरणानि तत्र तत्र वक्ष्यामि।

दित्यदितिभ्यां न ष्णेयः। आभ्यां वेत्त्यादौ ष्णेयो न स्यात्। दितिं वेत्ति अधीते वा दैत्यः, एवं आदित्य इत्यादौ ण्यः, न दैतेय आदितेय इति।

४३०। ढघे। ढश्च घश्च तत्तस्मिन्। कं कारकम्। षीकश्च कण् च णीनश्च इयश्च ते। नास्ति इत् येषां ते। चकारेण पूर्व्व-सप्त-त्या अनुकृष्यन्ते। तथाच अत्रत्यास्तत्रत्याश्च त्या एकादश सेतोऽनितश्चाभिधानाङ्गविष्यन्तीत्यर्थः।

ढादित्यधिक्रियते धात् प्राक्।

वेत्त्यधीते। ढात् परः ष्णः स्यात् वेत्त्यधीते अर्थे। वैया-

तर्कं वेत्ति अधीते वा तार्किकः, पदकः, क्रमकः, वैयाकरणः ; वाचा कृतं वाचिकं, पाणिनीयं ; शक्या युध्यते ऽसौ शाक्तीकः, याष्टीकः, तिथ्येण युक्ता रात्रिः तैथी, पौषी ; चक्षाय साधुः चक्षियः, यज्ञाय हितं यज्ञियं ; मथुराया आगतः माथुरः ; इह भवं ऐहिकं, कादाचित्कं, ग्रामीणः, ग्राम्यः, मूर्द्धन्यः, नादेयः शाक्तीयः, नागरः, अग्रयः ।

करण इति व्याङ् पूर्वात् कृधोरनट् णुः अर्, व्याकरणं वेत्ति अधीते वा इत्यर्थे णः णित्ति युम् त्रिः ययोरित्यकारलोपः । एवं प्रभाकरोपलक्षितो ग्रन्थः प्रभाकरस्तं वेत्ति अधीते वा प्राभाकर इत्यादि ।

णिक उक्थादेः षष्टिगतपथाभ्यां त्वणित् । उक्थादिः णिकः स्यात् षष्टिपथ-गतपथाभ्यान्तु षिकः । उपचारात् उक्थशब्द औक्थिकार्थः, तं वेत्ति अधीते वा औक्थिकः लौकायतिकः ।

उक्थादिर्यथा—

उक्थो लोकायतः सूत्रः पुराणं संहिता शरत्
वर्षा वसन्तो हेमन्तः सङ्घातः संग्रहो गणः ॥
अथर्वा गिरिरो वृत्तिश्चौर्यव्रण-लक्षणम् ।
न्याय-न्यासावनुपदानुगुणाकगुणा अपि ॥
द्विपदा विपदा ज्योतिरायुर्वेदः क्रमेतरः ।
यज्ञ लक्ष्यानुकल्पाश्च पुनरुक्तः पदःक्रमः ।

चरमप्रथमाभ्यान्तु गुणोऽथ क्रतुवाचिनः ।
आख्यानाख्यायिके (१) चेतिहासो वै लक्षणोत्तराः ॥
अधर्म्माद्यादिविद्यान्ता अथ कल्पादिवर्ज्जिताः ।
सूत्रान्ताश्चाथ कल्पान्तास्तथास्मिन्ननुसूरपि ॥

अथर्व्वाणं वेत्त्यधीते वा आथर्व्वणिकः, इके न नलोपः । नैयायिकः नैयासिकः, व्योर्युम् इतीमि त्रिः । अनुकल्प-शब्दं परे पठन्ति (२) । वस्तुतस्तु कल्पान्तत्वात् सिध्यति । चारम-गुणिकः प्राथमगुणिकः । क्रतुवाचिनः क्रतुविशेषवाचिनः । आश्वमेधिकः वाजपेयिकः राजसूयिकः । आख्यानं ग्रन्थान्तर्गता-पेक्षितस्य वर्णनम् । यवक्रीतमधिकृत्य कृतो ग्रन्थ इत्यर्थे ष्णे कृते क्वचित्तस्य लुक्, तं वेत्त्यधीते वा यावक्रीतिकः प्रैयङ्गविकः । मूले तार्किक इति (३) ।

आख्यायिका प्रबन्धविशेषः, तमधिकृत्य कृतो ग्रन्थः, त्यस्य लुक्, तं वेत्त्यधीते वा इत्यर्थे ष्णिकः । वासवदत्तिकः सौमनो-त्तरिक इत्यादि । लक्षणोत्तरा इति—लक्षणशब्द उत्तरो येषां, गौलक्षणिक आश्वलक्षणिकः । अधर्म्माद्यादिविद्यान्ता इति—सार्प-विद्यिकः वायसविद्यिकः । धर्म्मादयस्तु धार्म्मविद्यः त्रैविद्यः आङ्गविद्यः । अथानन्तरं कल्पादिवर्ज्जिताः सूत्रान्ता इति—सांग्रह-सूत्रिकः वार्त्तिकसूत्रिकः । कल्पादिस्तु काल्पसूत्रः । कल्पान्ता

---

(१) आख्यानविशेषवाचिनः, आख्यायिकाविशेषवाचिनश्च ।
(२) तन्मतानुसारेणैवास्माभिरपि स पठित इत्याशयः ।
(३) आख्यानोदाहरणमितिशेषः ।

इति—माटकल्पिकः पाराशरकल्पिकः । अनुसूर्नाम ग्रन्थविशेषः, तं वेत्त्यधीते वा इत्यर्थे ष्णिकः ।

इसुसुक्तान्तादिकस्य कः । उक् प्रत्याहारः । इसन्तादुसन्तादुक्प्रत्याहारात् तान्ताच्च परस्य इकस्य कः स्यात् । आनुसुकः, ष्णिकस्येकस्य कत्वविधानात् णित्ते त्रिः । षष्टिपथं वेत्त्यधीते वा षष्टिपथिकः षष्टिपथिकी शतपथिकः शतपथिकी ।

पदादेः कः । ढादित्येव । पदादेर्वेत्त्यधीते वार्थे कः स्यात् । मूले पदकः क्रमक इति । पदादिर्यथा—

पदं शिक्षा क्रमः साम मीमांसोपनिषच्च षट् ।

शिक्षकः मीमांसकः, केऽकः स्वः ।

पदोत्तरदादिकः । पदमुत्तरपदं यत्र तस्मात् इकः स्यात् वेत्त्यधीते वार्थे । पूर्वपदं वेत्त्यधीते वा पूर्वपदिक उत्तरपदिक इति । एकदेशिनस्तु पदोत्तरशब्दादेव इकः, पदोत्तरपदिक इत्याहुः । आनुपदिक इति उक्थादित्वात् ।

अनुब्राह्मणादिन् । उपनिषद्भागातिरिक्तवेदव्याख्यानं ब्राह्मणशब्देनोक्तं, तस्य सदृशम् अनुब्राह्मणं, सादृश्ये वसः, तद्वेत्त्यधीते वा अनुब्राह्मणी अनुब्राह्मणिनौ अनुब्राह्मणिन इति । चान्द्रास्तु अस्त्यर्थेना साधयन्ति इति चिन्त्यम् ।

इयस्तु वाधीते छन्दसः श्रोत्रञ्च । छन्दसोऽधीतेऽर्थे इयः स्यात् वा, तस्मिन् छन्दसः श्रोत्रादेशश्च । छन्दोऽधीते श्रोत्रियः पक्षे छान्दसः, त्वन्तस्य नानुवृत्तिः ।

सूत्रात् संख्याकोडो लुक् । सूत्रवाचिनः संख्याप्रकृतेः कोडो-

ऽध्येत्रवेदित्रोर्विहितस्य त्यस्य लुक् स्यात्। पाणिनीयमष्टकं (१) सूत्रं वेत्त्यधीते वा अष्टकः पाणिनीयः, दशको वैयाघ्रपदीयः। संख्येति किं? महावार्त्तिकं सूत्रं वेत्त्यधीते वा माहावार्त्तिकः। कीङ इति किं? चतुष्टयं सूत्रं वेत्त्यधीते वा चातुष्टयः।

सहसर्व्वपूर्व्वाच्च। सहपूर्व्वात् सर्व्वपूर्व्वाच्च लेः परस्याध्येत्रवेदित्रोर्विहितस्य त्यस्य लुक् स्यात्। सवार्त्तिकं वेत्त्यधीते वा सवार्त्तिकः ससंग्रहः, एवं सर्व्ववेदः सर्व्वशास्त्रः, पञ्च वेदान् वेत्त्यधीते वा तावि वाच्ये गः।

प्रोक्ताच्च। प्रोक्तविहितत्यान्तादध्येत्रवेदित्रोर्विहितस्य त्यस्य लुक् स्यात्। पाणिनिना प्रोक्तं वेत्ति अधीते वा पाणिनीयः स्त्रियां पाणिनीया, अपिशलस्यापत्यं आपिशलिः, तेन प्रोक्तम् आपिशलं, तद्वेत्त्यधीते वा आपिशलः स्त्रियामापिशला, षित्त्वेऽपि गौणत्वान्नेप्।

कल्प-सूत्र-च्छन्दो-ब्राह्मणानि तद्विषयाणि। एतानि प्रोक्ताधिकारत्यान्तानि अध्येत्रवेदित्रविषयाणि भवन्ति। अनन्यत्रभावो विषयार्थः। तथाच प्रोक्तत्यान्तानामध्येत्र-वेदित्र-विषयता-व्याप्य-विषयताकत्वमिति पर्य्यवसितार्थः (२)। एतेन स्वातन्त्र्यम् उपाध्यन्तरयोगे वाक्यञ्च निवर्त्तते। कल्पस्य तावत्—कश्यपेन

---

(१) अष्टौ अध्यायाः परिमाणमस्येति अष्टकम्।

(२) छन्दःप्रभृतिभ्यस्तदेव प्रोक्तार्थे प्रत्ययः स्यात् यदा प्रोक्तप्रत्ययान्तेभ्यः शब्देभ्यः परं वेत्त्यधीते वेत्यर्थे प्रत्ययस्तल्लोपश्च सम्भाव्यते। न हि कठेन प्रोक्तं कठमिति स्वातन्त्र्येण प्रयोगः स्यात्। तेन कठेन प्रोक्तं कठम्। कठं वेत्त्यधीते वा कठ इत्येवं वाक्यमपि न स्यात्। अतएवोक्तं कठेन प्रोक्तमधीते इति बृहन्मुग्धबोधम्।

प्रोक्तं कल्पं (१) वेत्त्यधीते वा काश्यपी, कश्यपशब्दात् प्रोक्तार्थे णिन् (२) तस्मादध्येतृवेदितृोः षणः, तस्य लुक्, लुकि सति अनेन प्रोक्तस्याध्येतृवेदितृविषयत्वे लिङ्गवचने (३) न भवतः। एवं कौशिकी। इह कल्पविषयस्य ग्रहणात् पैङ्गीकल्प इत्यादौ न स्यात्। सूत्रस्य तावत्—पाराशर्येण प्रोक्तं भिक्षुसूत्रं वेत्त्यधीते वा पाराशरी भिक्षुः, कर्म्मन्दी भिक्षुः (४) शैलाली नटः, कृशाश्वी नटः (५)। छन्दस्तावत्—कठो ब्राह्मणः, तेन प्रोक्तं छन्दो वेत्त्यधीते वा कठः, मोदः पैप्पलादः आर्चाभी वाजसनेयी। ब्राह्मणस्य तावत्—तण्डिना विप्रेण प्रोक्तं ब्राह्मणं (६) वेत्त्यधीते वा ताण्डी शाट्यायनी ऐतरेयी। एषामिति किम्? पाणिनीयं व्याकरणम्।

अगोत्रणि-कण्वादिणिग्राहृद्वादीयो भवादौ। गोत्रविहितणिगन्तवर्ज्जितात् कण्वादिणिगन्तवर्ज्जिताच्च हृदसंज्ञकादीयः स्यात् भवादिष्वर्थेषु। गार्गीयः वात्सीयः शालीयः शैवीयः औपगवीयः त्वदीयः मदीयः अस्मदीय इत्यादि। गोत्रणि-कण्वादिणिग्भ्यान्तु दाचः काण्वः जामदग्न्यः। गोत्रार्थ इति किम्? सुतङ्गमेन

---

(१) यागक्रियोपदेशको वेदाङ्गग्रन्थविशेषःकल्पः।

(२) णिनुविधायकसूत्रं परत्र वक्ष्यति।

(३) लिङ्गवचने इति प्रोक्तस्येत्यनेनान्वयः।

(४) कर्म्मन्देन प्रोक्तं भिक्षुसूत्रं वेत्त्यधीते वेति। भिक्षुः परिव्राट् कर्म्मन्दीत्यमरः।

(५) कृशाश्वीत्यत्र वक्ष्यमाणसूत्रेण इन्।

(६) मन्त्रेतरवेदभागो ब्राह्मणम्।

निर्वृत्तः सौतङ्गमः, तस्येदं सौतङ्गमीयम्। ण्य इति किम्? कण्वो देवताऽस्य काण्वः, तस्येदं काण्वीयम्।

द्यचः प्राच्यभरताच्च। प्राच्यगोत्रणयन्तात् भरतगोत्रणयन्ताच्च द्यच ईयः स्यात् भवादौ। पूर्वेणाप्राप्तेऽनेन विधीयते। पौष्पीय वैङ्गीयः काश्मीयः। द्यच इति किम्? पात्रागारः। प्राच्यभरतादिति किम्? दाक्षः प्लाक्षः। ननु कथं काश्मीय इत्युदाहृतं, काश्मादेर्णिकणिकयोर्विधानादिति चेन्न, तत्र चेदिशब्द-समभिव्याहृत देशवाचक-काश्मीशब्दग्रहणात्। इह गोत्रार्थस्य ग्रहणं, न तु देशवाचकस्येति।

कखोङो देशे। वृद्धादित्येव। ककारोङः खकारोङश्च देशे वर्त्तमानाद्वृद्धादीयः स्यात् भवादौ। कोङ्णस्य वाह्वीकग्रामेभ्यश्चेति णिकणिकयोर्बाधनार्थमिदम्। आवहनकीयं द्रौघनकीयम् आश्वत्थकीयं कौटशिखीयम् आयोमुखीयम्। वृद्धादिति किम्? सौमुखम्।

ग्राम-कन्था-ह्रद-पलद-नगरोत्तरदात्। ग्रामाद्युत्तरदाद्देशवाचकात् वृद्धादीयः स्यात् भवादौ। दाक्षिग्रामीयं दाक्षिकन्थीयं दाक्षिह्रदीयं दाक्षिपलदीयं दाक्षिनगरीयं माहकिग्रामीयमित्यादि। वृद्धादिति किम्? महनगरे भवः माहनगरः। उत्तरदादिति किम्? वाहुग्रामं वाहुनगरम्। वाह्वीकग्रामेभ्यश्चेति णिकणिकयोर्बाधकमिदम्।

पर्णङ्ककणाङ्गारद्राजे। वृद्धादिति निवृत्तम्। भारद्राजे नाम्नि देशे वर्त्तमानाभ्यां पर्णङ्ककणाभ्याम् ईयः स्यात् भवादौ। पर्णीयं ङ्ककणीयम्। भारद्राजदेशभिन्ने तु पार्णं कार्कणम्।

गह्वादेर्भवतस्तु दङ् च । गह्वादेरीयः स्यात् भवादौ, भवच्छब्दस्य ईये दङ् च, ङ इत् । गह्वीयम् अन्तरीयम् ।

गह्वादिर्यथा—

गह्वान्तरौ नेमि-समानशाखौ दत्तास-काठेरणि-धन्विनश्च ।
आहिंसि-नाठेरणि-पूर्व्वपद्या भौरिः समः शैशिरिरुत्तरश्च ॥
उत्तमो विषमो भौजिरन्तस्थो मगधासुरी ।
इषुप्रापरपद्याङ्गाधमशाखा स्तथा भवत् (१) ॥
शौङ्गिरुत्तमशाखश्च व्याड़ि-खाड़ायनौ तथा ।
इष्वनीकोऽग्निशर्म्मा च शौद्रि-वाराटकौ तथा ॥
एकवृत्तश्च वाल्मीकिरवस्यन्दन पार्श्वतः (२) ।
एकग्रामो दैवशर्म्मिः कामप्रस्थस्तथैकतः ।
आमित्रेयकपलाशी (३) च मुखतः चौमधृत्वि च ॥

येऽत्र वृद्धास्तेभ्य औत्सर्गिकः ष्णो, येऽवृद्धास्तेभ्यो जनपदत्वात् णको, ये तु षणन्तास्तेभ्यो ऽभिन्नप्राच्यभरतात् ष्णो बाध्यते । पार्श्वतीयः, व्यटेर्लोप इति टिलोपः । कामप्रस्थशब्दात् प्रस्थान्तत्वात् णके प्राप्ते विधानम् । पूर्व्ववदेकतीय इति चान्द्राः । आकृतिगणोऽयम् । भवच्छब्दस्यान्तस्य दङ् भवदीयः ।

पर्व्वताद्य त्वऽमनुष्ये । पर्व्वतशब्दान्मनुष्ये वाच्ये ईयः स्यात् भवादौ, मनुष्यभिन्ने तु वा । पर्व्वतीयो मनुष्यो राजा वा, पर्व्वतीयं पार्व्वतमुदकम् ।

---

(१) इषुप्र, अपरपद्य, अङ्ग अधमशाख ।

(२) पार्श्वतश् ।

(३) आमित्रि· एकपलाश ।

गर्त्तोत्तरदादेशे। देशवाचकाद्गर्त्तोत्तरदादीयः स्यात् भवादौ। वृकगर्त्तीयः। उत्तरादिति किम्? वाहुगर्त्तम्। वाह्लीक-ग्रामेभ्यश्चेति णिकष्णिकयोर्बाधनार्थम्।

प्राचि तु कटादेः। प्राग्देशवाचिनः कटपूर्व्वादीयः स्यात् भवादौ। कटनगरीयम्। कटघोषीयम्। प्राग्देश इति किम्? काटनगरः।

स्व-पर-देव-राज-जनस्य कंश्च। एभ्य ईयः स्यात्, एषां कन् च। स्वकीयः (१) परकीयः देवकीयः राजकीयः जनकीयः। आगम-शासनमनित्यमिति न्यायात् स्वीयं देवीयमित्याद्यपि। तथाच धनमहरहर्दत्तं स्वीयमिति शिष्टप्रयोगः। वामनधर्म्मदासौ तु स्वस्य इदं सौवमित्याहतुः।

पृथिवीमध्याच्च मध्यमश्च। पृथिवीमध्यशब्दात् ईयः स्यात्, तस्मिन्मध्यमादेशश्च। मध्यमीयः।

वेणुकादेर्णित्। वेणुकादेरीयो णित् स्यात् भवादौ। वैणु-कीयम्। वेणुकादिर्यथा—

वेणुक चित्रकमुत्तरपदकं मध्यमपदकः प्रस्थकमन्यत्।

अन्यदित्यनेन शारदीयम्। वेणुकादिपञ्चानां कौङ्त्वात् ष्णे प्राप्ते पाठः। आकृतिगणोऽयम्।

---

(१) धनमहरहर्दत्तं स्वीयमित्यसाधुरिति पशुपतिरिति संक्षिप्तसारे (४३९सू) द्वारादीनाञ्चेत्यत्र वामनेन धर्म्मदासेन च स्वस्येदं सौवमित्युदाहृतम्, अस्माभिरपि स्वादेरित्यत्र। तस्मात् क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति वक्तव्यम्। इति गोयीचन्द्रः।

काश्यादेर्णिकण्णिकौ। काश्यादेः परौ णिकण्णिकौ स्यातां भवादौ। काशिका काशिकी चैदिका चैदिकी। काश्यादिर्यथा।

काशिश्च चेद्यच्युत-मोदमानाः
संवाह-गोवासन-साधुमित्रम्।
सुरङ्ग-सम्मात्युपराज पूर्व्व-
कालोर्ङ्कालाऽपि सिन्धुमित्रः।
शकुलादो हस्तिकर्षूः कुनामा करणेन च।
आपत्काल-हिरण्याभ्यां दासमित्रेण संयुतः॥
दासग्रामो देवदत्तो युवराजयुतस्तथा।
सर्व्ववर्म्मा देवराजो व्यासोऽरिन्दम एव च॥
सौधावतान इत्यष्टाविंशतिः समुदीरिताः।

काशिचेदिभ्यां जनपदत्वात् णकः, सम्मातिशब्दात् व्वभिन्न-प्राच्यभरतगोत्रणप्रत्यन्तात् ष्णो, येऽत्र वृद्धास्तेभ्यः ईयो, येऽवृद्धास्तेभ्यः ष्णो, हस्तिकर्षूशब्दादेशवाचकादुदन्तात् णिकश्च बाध्यते। देवदत्तशब्दोऽत्र प्राग्देशवाचकः, तस्माद्वृद्धसंज्ञकत्वादीये प्राप्ते विधानम्। वाह्लीकग्रामवाचकात्तु (१) दैवदत्तः।

वृद्धाद्वाह्लीकग्रामाद्वा तूशीनरग्रामात्। वाह्लीकग्रामवाचकात् वृद्धात् णिकण्णिकौ स्यातां भवादौ। शाकलिका शाकलिकी मान्यविका मान्यविकी। अवृद्धात्तु माहनगरम्। उशीनर-ग्रामवाचकात्तु आम्रजालिका आम्रजालिकी सौदर्शनिका सौदर्शनिकी, पक्षे आम्रजालीया सौदर्शनीया।

(१) वाह्लीकदेशीयग्रामवाचकात्।

देशे युङ्मरुवचनाभ्यां णकोऽख्याञः । वृद्धादृयुङो देशवाचकाद्वृद्धान्मरुवाचकाच्च णकः स्यात् भवादौ न तु ख्याञः (१)। सांकाश्यकः काम्पिल्यकः मागध्यकः । धन्वन्शब्दो मरुवाची, पारेमध्ये इत्यादिना व-सः, अन इत्यनेनास्यः (२) पारेधन्वे जातः पारेधन्वकः, ऐरावते जातः ऐरावतकः । ख्याञस्तु सुप्रख्यस्य इदं सौप्रख्यं सौप्रख्यदेशे भवः सौप्रख्यीयः, ख्याञो यकारः शकारस्थानीयः, तस्यासिद्धत्वमिति पाणिनीयाः ।

वहप्रस्थपुरान्ताच्च । वहान्तात् प्रस्थान्तात् पुरान्ताच्च देशवाचिनो वृद्धात् णकः स्याद्भवादौ । पैलुवहकः फाल्गुनीवहकः, मालाप्रस्थकः, नान्दीपुरकः । रूढत्वात् परसूत्रेण सिद्धे पुरग्रहणं प्राच्यार्थं, तथाहि नान्दीपुरमुदीच्यम् । वृद्धादिति किं शैवपुरः ।

प्राचि त्वी रूढः । प्राचीति देशविशेषणम् । ईकारान्ताद्रेफोऽश्च प्राग्देशवाचकात् वृद्धात् णकः स्याञ्चवादौ । माकन्दी—माकन्दकः, काकन्दी—काकन्दकः । पाटलिपुत्रकः ऐकचक्रकः, एकचक्रशब्दस्य प्राग्देशे एङादित्वात् वृद्धसंज्ञा । वृद्धादिति किं ? दशपुरे जातः दाशपुरः । प्राचीति किं ? दात्तामित्रीयः सौवीरनगरीयः । दात्तामित्री सौवीरनगरी, एते उदीचदेशस्थे ।

जनपद-तदवधिभ्याम् । वृद्धाद्देशवाचिनो जनपदात् जनपदा-

---

(१) ख्याधातुसाधितयकारोऽङ् शब्दाच्चेत्यर्थः ।

(२) समासान्तः अप्रत्यय इत्यर्थः ।

वधेश्च (१) णकः स्याज्जवादौ। आभिसारकः, अप्राच्यत्वात् पूर्वेणाप्राप्तेऽनेन णकः। आदर्शकः। जनपदावधेस्तावत् औपुष्टकः श्यामायनकः। ननु जनपदावधिर्जनपद एव न ग्रामः, किमर्थं तर्हि पृथग् ग्रहणमिति चेत् सत्यं, तदवधिग्रहणं बाधकबाधनार्थं, तेन चैगर्त्तकः इत्यत्र गर्त्तोत्तरपदादितीयं बाधित्वा जनपदावधेर्णक एव स्यादिति वामनः।

व्वविषयादह्वाच्च। अह्वात् ह्वाच्च जनपदवाचिनस्तदवधिवाचिनश्च व्वविषयात् णकः स्याज्जवादौ। णेययोरपवादः। अह्वाज्जनपदात्तावत्—अङ्गाः आङ्गकः (२)। अह्वाज्जनपदावधेस्तावत्—अजमीढ़ाः आजमीढ़कः, अजक्रन्दाः आजक्रन्दकः। ह्वाज्जनपदात्तावत्—दार्व्वाः दार्व्वकः। ह्वाज्जनपदावधेस्तावत्—कालञ्जराः कालञ्जरकः। विषयग्रहणमनन्यत्वभावार्थं (३) तेन जनपदैकशेषबहुत्वे मा भूत्। तेन वर्त्तनी च वर्त्तनी च वर्त्तनी च ता वर्त्तन्यः, वार्त्तनः (४)। ननु ह्वात् पूर्वेणैव णके सिद्धे किमर्थं चकारेण तदनुकर्षणमिति? उच्यते—ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय इति न्यायात् व्वविषयात् ह्वाद्बाधा विज्ञेयेत्यदोषः (५)।

---

(१) जनपदश्चावधिश्चेति कर्म्मधारयाज्जनपदरूप एवावधिर्लभ्यते—इति तत्त्वबोधिनी।

(२) अङ्गा जनपदास्तेषु भव आङ्गकः।

(३) यः शब्दो नित्यबहुवचनान्तस्तदर्थायं विधिरिति भावः।

(४) वर्त्तनीषु भवो वार्त्तन।

(५) अयमेव तक्रकौण्डिन्यन्याय इत्युच्यते—पूर्वस्थले हि जनपदसामान्ये

वर्त्ताऽग्नि-कच्छ-वक्त्रोत्तरदात्। वर्त्ताद्युत्तरदात् देशवाचकात् हृद्वादहृद्वाच्च णकः स्याद्भवादौ। णेययोरपवादः। चक्राणि वर्त्तन्तेऽत्र चक्रवर्त्तः हृतुङ् वर्त्तने डे घञ् तस्माच्चाक्रवर्त्तकः। एवं कालाग्नकः चारुकच्छकः ऐन्द्रवक्त्रकः। वर्त्ताग्निकच्छवक्त्रान्तादिति क्ते सिद्धे उत्तरदग्रहणं वहुत्यपूर्व्वादप्रात्यर्थं, तेन वाहुवर्त्तः। कथं वाहुवर्त्तकः इति? उच्यते—वहवो वर्त्तन्तेऽत्र इति व्युत्पत्त्या वाहुवर्त्तकः।

धूमादेः। धूमादेर्देशवाचकाण्णकः स्याञ्जवादौ। धौमकः घोषस्थलकः। धूमादिर्यथा—

धूमो घोषस्थली घोषपुष्पो दाण्डायनस्थली।
धार्त्तराज्ञी सुराज्ञी च तीर्थ-पल्ली-शशादनाः (१)।
शस्त्राग्निता राजगृहं भत्तालीवर्व्वरावयी (२)॥
शस्यायो माठरो मद्रकुलोऽञ्जीकुलगर्हभौ (३)।
आर्জ্জুनायन-साकेत-षड়ण्ड-दक्षिणापथाः॥
द्वीपाऽन्तरीपोज्जयिनी-द्वाहाराऽरुण-कुक्षयः।
एकत्रिंशदिमे प्रोक्ता स्त्र्याहारश्च महास्थली॥

हृद्वात् णको विहितः, यथा ब्राह्मणसामान्ये दधिदानम्; इह तु वहुवचनविषये विशेषे अहृद्वात् णकः, यथा कौण्डिन्ये तक्रदानम्। ततश्च वहुवचनादपि हृद्वात् णके प्राप्ते आरभ्यमाणः अहृद्वात् णकः हृद्वात् णकस्य वाधकः स्यादिति चकारेण समुच्चीयते इत्यर्थः इति पदमञ्जरी।

(१) पल्लीत्यत्र वल्ली इत्यपि पाठः।

(२) वर्व्वर, आवय।

(३) अञ्जीकुल, आञ्जीकूल, आजीकूल इति पाठत्रयम्।

नगरात् कुत्सन प्रावीण्ययोः । निन्दायां प्रावीण्ये च नगर-शब्दात्तकः स्याङ्गवादौ । नागरकः चौरः प्रवीणश्च । कुत्सनः प्रावीण्ययोरिति किं नागरः पुरुषः ।

अरण्यान्-पथि-न्याय-विहाराऽध्याय-हस्तिषु वा तु गोमये । अरण्यादेर्तेषु वाच्येषु णकः स्याङ्गवादौ गोमये तु वा । आरण्यको मनुष्यः न्यायो विहारो ऽध्यायो हस्ती च । आरण्यको गोमयः आरण्यश्च । एष्विति किम् आरण्याः पशवः ।

कच्छादेर्नृ-तत्स्थयोः । देशवाचकात् कच्छादेर्मनुष्ये मनुष्यस्थे च वाच्ये णकः स्याङ्गवादौ । काच्छको मनुष्यः, काच्छिका चूड़ा, काच्छको नखः, काच्छकं हसितं, काच्छको विवादः । काश्मीरको मनुष्यः काश्मीरको नखः काश्मीरकं हसितम् ।

कच्छादिर्यथा—

कच्छ कश्मीर कम्बोज मधुमत् कुरु सिन्धवः ।
कुतूभर-विरूपौ च द्वीपाऽनूप-विजापकाः ।
साल्वाऽङ्गाराऽनुपण्डाश्चाऽजवाहो वर्गुरङ्गु च ॥

इह साल्वशब्दपाठो वक्ष्यमाणण्प्रार्थ्यः ।

साल्वात्पदातौ । साल्वशब्दात् पदातिभिन्ने मनुष्ये मनुष्यस्थे च वाच्ये णकः स्याङ्गवादौ । साल्वको मनुष्यः, साल्वकं हसितम् । पदातौ तु साल्वः पदातिर्व्रजति । नियमार्थं वचनम् ।

गो-यवाग्वोश्च । साल्वादित्येव । साल्वको गौः, साल्विका यवागूः ।

वर्गोः कन्यायाः । वर्गुर्नाम नदः, वर्गुनदसमीपवाचिनः

कन्याशब्दात् णकः स्याञ्ञवादौ। ष्णिकस्य बाधकमिदम्। कान्यकः अन्यत्र कान्यिकः।

वा तु कुरु-युगन्धराभ्याम्। आभ्यां णको वा स्याञ्ञवादौ। कौरवकः कौरवश्च गौः। नृतत्स्थयोस्तु कौरवको मनुष्यः, कौरविका चूड़ा, कच्छादिपाठात् यौगन्धरकः यौगन्धरश्च गौः। जनपदावेतौ, एताभ्यां वृद्धादपीति (१) नित्ये प्राप्ते विकल्पः।

कुलात् सौवीरे। कुलशब्दात् सौवीरे वाच्ये णकः स्याञ्ञवादौ। कौलकः सौवीरः, अन्यत्र कौलः।

पाथेयाऽऽनर्त्त-विदेह-पाण्डुकात्। एभ्यो णकः स्याञ्ञवादौ। पाथेयशब्दस्य युङ्लेऽपि अदेशार्थं वचनम्। आनर्त्तविदेहयोर्जनपदत्वेऽपि अजनपदार्थम्। पाण्डुकशब्दात् कोङः ष्णस्य बाधनार्थम्। यथा-पाथेयकः आनर्त्तकः वैदेहकः पाण्डुककः।

राष्ट्रादियः। राष्ट्रशब्दादियः स्याञ्ञवादौ। राष्ट्रियः।

दूरोत्तराभ्यामित्य-णाहौ। आभ्यामेतौ क्रमात् स्तः भवादौ। दूरेत्यः औत्तराहः।

नदी-कच्चि-पार-दिवादिभ्यः ष्णेय-णेयकेन-याः। नद्यादेः ष्णेयः कच्चग्रादेर्णेयकः पारादेरीनो दिवादेर्यः स्याञ्ञवादौ। नादेयः वाराणसेयः। नद्यादिर्यथा—

नदी वाराणसी दार्व्वा (२) वामा काशायनी मही।
श्रावस्ती खादिरी दामा कौशाम्बी सेनकी (३) गिरिः॥

---

(१) अनयोः संज्ञावाचकत्वाद्वृद्धत्वम्।

(२) दूर्व्वा इत्यपि पाठः।

(३) सेतकीत्यपि पाठः।

साल्वा दार्वी पुरं पूर्व्वनगरी, वड़वा हृषे।

चम्पवनमिति प्रोक्तं नद्यादौ कोविदोत्तमैः।

येऽत्र हृद्वास्तेभ्य ईयः, येऽहृद्वास्तेभ्यः ष्णः, हृद्वेकारान्तात्मकः. रुङो णकश्च बाध्यते। वाड़वेयो हृषः, अन्यत्र वाड़वः। कत्त्रादेस्तावत्—काक्षेयकः (१) औभ्रेयकः। कत्त्रादिर्यथा।

कत्त्रभ्रिपुष्करं हस्ती पुष्कल-ग्राम-यौवनम्।

कुण्डी (२) चर्म्मखती माहिषती ग्रीवा तु भूषणे।

कुड्यायास्तु यलोपोऽस्मिन्नसौ कुक्षिः कुलं शुनि (३)।

संज्ञायां नगरी पञ्चदशेह परिकीर्त्तिताः।

ग्रैवेयकं कण्ठभूषा। कौडेयकः अत्र णेयके यलोपः। कौक्षेयकः खड्गः। कौलेयकः श्वा। अत्र संज्ञायां नगरीशब्दः पठ्यते नागरेयकः। जातौ तु नागरः। पारादेः—पारीणः अवारीणः। पारादिर्यथा—

पाराऽवाराऽवारपार-पारावारा इमे मताः।

ग्रामश्च पञ्च पारादावाहुः पण्डितसत्तमाः॥

दिवादेः—दिवि भवं दिव्यम्। दिवादिर्यथा—

दिव् प्राग् वागुदक् प्रत्यक् परार्द्धग्राममित्यपि।

ऊर्द्धाऽपरार्द्धाऽधमार्द्धोत्तमार्द्धमिह कीर्त्तितम्।

ग्रामशब्दस्य त्रिषु (४) पाठात् ग्रामेयकः ग्रामीणः ग्राम्य इत्यादि।

---

(१) कुत्सितास्त्रयः कत्त्रयस्तत्र भवः। (२) कुण्डिन्।

(३) अस्मिन् णेयके परे कुड्यशब्दस्य यलोपः। अथो खड्गे वाच्ये कुक्षिशब्दस्तथा शुनि वाच्ये कुलशब्दः कत्त्रादिः। (४) कत्त्रादौ पारादौ दिवादौ च।

कापिश्यादेः ष्णायनो वा तु रङ्कोरन्यप्राणिनि।

कापिश्यादेः ष्णायनः स्याञ्ञवादौ, रङ्कोस्तु नृभिन्नप्राणिनि वा। कापिशायनः। कापिश्यादिर्यथा—

कापिशी वाह्लि-पर्द्युर्दि चतुष्कं परिकीर्त्तितम् (१)।

कापिशीशब्दाद्वृद्धसंज्ञकादीयः, शेषेभ्यः अवृद्धादपि व्वविषयादिति णको बाध्यते। राङ्कवायणो राङ्कवो गौः। प्राणिनीति किं? राङ्कवः कम्बलः। अनरीति किं? राङ्कवको मनुष्यः। रङ्कुशब्दः कच्छादौ पठ्यते।

रूप्योत्तरदारण्याभ्यां णः। रूप्योत्तरदादरण्याच्च णः स्याञ्ञवादौ। वार्करूप्यं, ण्यापवादः। वृद्धसंज्ञकात्तु माणिक्यरूप्यात् युङो णको बाध्यते, णविधानात्। आरण्यः। स्त्रियामारण्या गौः।

दिक्पूर्व्वदादनामनि। दिक्शब्देन दिग्वाचकोऽभिधीयते। दिक्पूर्व्वं दं यस्य तस्मात् असंज्ञायां णः स्याञ्ञवादौ। पौर्व्वशालः, औत्तरशाला स्त्री, दिश उत्तरदे तार्थे यस इति परे (२)। नास्ति तु पूर्व्वा चासाविषुकामशमी चेति पूर्व्वेषुकामशमी, तस्मात् प्राग्देशनगरादिभ्य इति औत्सर्गिकष्ठे सुपञ्चालादित्वात् अन्त्यस्य दस्य त्रिः। दग्रहणं स्वरूपविधेर्निरासार्थम्।

मद्रात् ट्टः। दिक्पूर्व्वदादित्येव। दिक्पूर्व्वान्मद्रशब्दात्

---

(१) कापिशी· वाह्लि, पर्दि, उर्द्दि। वाह्लिरित्यत्र पक्षिरित्यपि पाठः।

(२) स्वमते पूर्व्वा चासौ शाला चेति, तस्यां भव इति वाक्यम्। परमते तु पूर्व्वेषां शालायां भव इति वाक्यम्।

ट्टः स्याञ्चवादौ। पूर्ववदुय-सः। पौर्व्वमद्रः। अमद्रा दिश इति पर्य्युदासात् (१) पूर्वदस्य त्रिः।

वह्वचोऽन्तोदात्तादुदीच्यग्रामात्। उदीच्यग्रामवाचकादन्तोदात्ताद्वह्वचो लेः ट्टः स्याञ्चवादौ। ष्णस्यापवादोऽयम्। माहनगरम्। महनगरशब्दस्य यसः स्वरेणान्तोदात्तत्वात्। उदीच्यग्रामादिति किं, माथुरः मध्यदेशग्रामत्वात् ष्णः। वह्वच इति किं? ध्वाजः ध्वजीशब्दात् ष्णः। अन्तोदात्तादिति किं? शार्करीधानम्। अस्मिन् शास्त्रे स्वरलक्षणाभावेऽपि हृद्योपदेशादन्तोदात्तादिकमवगन्तव्यम्। स्वरलक्षणानि नोक्तानि अस्मिन्ननतिप्रयोजनत्वात्।

तीरोत्तरदाच्च। तीरोत्तरदाच्छब्दात् ट्टः स्याञ्चवादौ। ष्णेय-योरपवादः (२)। पाल्वलतीरं काकतीरम्।

कन्याभवङ्गयां ष्णिकः। आभ्यां ष्णिकः स्याञ्चवादौ। ष्णेययीरपवादः। कान्यिकः, भावत्कः इसुसुक्तान्तात् ष्णिकस्य कः। गहादिपाठात् भवदीयः। भवदित्यत्र डवत्वन्तस्य ग्रहणात् शत्वन्तभवच्छब्दान्मा भूत्, तेन भावत इति।

ओर्देशे हृद्वात्तु प्राचि। उवर्णान्ताद्देशवाचकात् ष्णिकः स्याञ्चवादौ, प्राग्देशे वर्त्तमानादुवर्णान्ताद्वृद्वादेव, नान्यस्मात्। मरौ जातः मारुकः उवर्णान्तादिकस्य कः णिति त्रिः। एवं नैषादकर्षुकः शावरजम्बुकः। शवरजम्बूशब्दस्य इकस्य के कृते कोऽकः स्व इति स्वः। देशे इति किं? पाटवः वैणवः। प्राचि हृद्वात्तु आढ़कजम्बुकः नापितजम्बुकः। उवर्णाद्वृद्वादित्येव ष्णिकः।

---

(१) सुपञ्चालादाविति शेषः। (२) ष्णस्य, ढ्यस्य च अपवाद इत्यर्थः।

ह्वादिति नियमात् अह्वादान्मा भूत्, तेन पर्णवास्तुशब्दस्य पार्ण-वास्तवः। एवं माल्लवास्तवः।

कालेभ्यः। कालवाचिभ्यः ष्णिकः स्याञ्ज्ञवादौ। मासिकम् आर्द्धमासिकं सांवत्सरिकम् आर्द्धसांवत्सरिकं (१)। यथाकथञ्चि-द्गुणवृत्त्या काले वर्त्तमानादपीष्यते, तेन कादम्बपुष्पिकः व्रैहि-पलालिकः (२)। न च गौणमुख्ययोर्मुख्ये कार्य्यसंप्रत्यय इति वाच्यं, गौणवृत्त्या काले वर्त्तमानेभ्यो नक्षत्रवाचिभ्यः ष्णविधा-नात्। कालेभ्य इति ब्वनिर्देशः स्वरूपविधेर्निरासार्थः।

श्राद्धे शरदो, वा तु रोगातपयोः। श्राद्धे वाच्ये शरच्छब्दात् ष्णिकः स्याञ्ज्ञवादौ, रोगे आतपे च वाच्ये वा। ऋतुष्णस्य बाधको-ऽयम्। शारदिकं श्राद्धम्। श्राद्धं कर्म्मविशेषः, न तु श्रद्धावान् पुरुषः। शारदिको रोगः आतपश्च, पक्षे शारदः।

वर्षाभ्यो, वा तु निशाप्रदोषहेमन्तपूर्व्वाह्णापराह्णेभ्यः। वर्षा-शब्दात् ष्णिकः स्याञ्ज्ञवादौ, निशादेस्तु वा। वार्षिकम्। नैशिकं नैशं, प्रादोषिकं प्रादोषं, हैमन्तिकम्। हेमन्तस्य ष्णे तलोपो वा। हैमन्तः हैमनः। तथाच—"हैमनीषु रजनीषु शेरते" इति वृत्तिकृता शिष्टप्रयोग उद्भावितः। पौर्व्वाह्णिकम् आप-

---

(१) कथन्तर्हि "शार्व्वरस्य तमसो निषिद्धये" इति कालिदासः। "अनु-दितौषसरागेति" भारविः। समानकालीनम्। प्राक्कालीनमित्यादि च? अप-भ्रंशा एवैत इति प्रामाणिकाः—इति सिद्धान्तकौमुदी।

(२) कदम्बपुष्पसाहचर्य्यात् कदम्बपुष्पः कालः; व्रीहि-पलालसाहचर्य्यात् व्रीहि-पलालः कालः; तत्र भवःकादम्बपुष्पिकः व्रैहिपलालिकः।

राङ्किकम् । पक्षे त्यत्राद्यचिर इति ष्टनः, पूर्वाङ्केतनम् अपराङ्केतनम् ।

श्वसः ष्णिकस्य तम् । श्वस्शब्दात् ष्णिकस्यादौ तम् स्यात्, म इत् । शौवस्तिकम् । ननु त्यत्राद्यचिरेत्यादिना त्यष्टनाभ्यां बाधिष्यते, तत् कथं ष्णिक इति चेत् सत्यम्, ष्णिकस्य तम्विधानसामर्थ्यात् ष्णिकोऽपि । तत्रोभयगणपाठात् श्वस्त्यः श्वस्तन इत्यपि ।

सपूर्व्वदादर्द्धात् दिक्पूर्व्वात्तु यश्च । पूर्व्वदेन सह वर्त्तमानादर्द्धशब्दात् ष्णिकः स्यात्, दिक्पूर्व्वदात्तु यः ष्णिकश्च भवादौ । गौतमार्द्धिकं वालेयार्द्धिकम् । दिक्पूर्व्वात्तु पौर्व्वार्द्धिकं पूर्व्वार्द्धं दाक्षिणार्द्धिकं दक्षिणार्द्धं । दिवादित्वात् परार्द्धमपरार्द्धमिति नित्यम् । उभयत्र दग्रहणं स्वरूपविधेर्निरासार्थम् ।

ग्रामजनपदैकदेशाद्दिक्पूर्व्वादर्द्धात् ट्णश्च । ग्रामैकदेशवाचिनो दिक्पूर्व्वादर्द्धाज्जनपदैकदेशवाचिनो दिक्पूर्व्वादर्द्धाच्च ष्णिक-ट्णौ स्यातां भवादौ । यस्यापवादः । पौर्व्वार्द्धिकः पौर्व्वार्द्धः दाक्षिणार्द्धिकः दाक्षिणार्द्धः । ग्रामजनपदैकदेशादिति किं ? पौर्व्वार्द्धिकं पूर्व्वार्द्धमिति पूर्व्वेण ष्णिक-यौ ।

प्रावृष एण्यः । प्रावृट्शब्दादेण्यः स्याञ्चवादौ । प्रावृषेण्यः । ण्यविधानं प्रावृषेण्यमाचक्षाणः प्रावृषेण् इत्यत्र ण्यार्थम् ।

मध्यादः साधारणे । साधारणे वाच्ये मध्यशब्दादः स्याञ्चवादौ । मध्यो वैयाकरणः, नोत्तमो नाधम इत्यर्थः । त्यत्राद्यचिरेति प्राप्तस्यापवादः ।

द्वीपादुपसमुद्रात् ष्णः। समुद्रसमीपे वर्त्तमानात् द्वीपात् ष्णः स्याञ्ञ्वादौ। कच्छादित्वात् ष्णे प्राप्ते नृतत्स्थयोर्णके च प्राप्ते विधानम्। द्वैप्यं, "द्वैप्यं भवन्तोऽनुचरन्ति चक्रम्"। अनुपसमुद्रात्तु द्वैपः। नृतत्स्थयोस्तु द्वैपकः।

ऋतुनक्षत्रात् ष्णः। ऋतुवाचकान्नक्षत्रवाचकाच्च ष्णः स्याञ्ञ्वादौ। कालष्णिकस्यापवादः। ग्रैष्मं, पौषम्।

कोडःकच्छपलद्यादेश्च। कोडः कच्छादेः पलद्यादेश्च ष्णः स्याञ्ञ्वादौ। नैलीनकः। निलीनकशब्दाञ्ञ्वचोऽन्तोदात्तात् ट्ष्णे प्राप्ते विधानम्। इक्ष्वाकुषु जात ऐक्ष्वाकः। इक्ष्वाकुशब्दात् "ओर्देशे" इत्यनेन ष्णिकं बाधित्वा ष्णः स्यात्, अञ्ञ्वादपि ञ्वविषयादिति प्राप्तो णको बाध्यते। ष्ण-ट्ष्णयोरिक्ष्वाकोरुतो लुक्। कच्छादेस्तावत्—काच्छः काश्मीर इत्यादि। कच्छादिः प्रागुक्तः। कच्छादौ ये जनपदवाचका अञ्ञ्वास्तेभ्योऽञ्ञ्वादपि ञ्वविषयादिति णके प्राप्ते विधानम्। उवर्णान्तात्तु "ओर्देश" इति ष्णिकबाधनार्थम्। कच्छशब्दो न नित्यबहुवचनान्तः, तस्मात् ष्णो वेत्यादाविति ष्णे सिद्धे इह पाठः कच्छादेर्नृतत्स्थयोरिति णकबाधनार्थः। विजायकशब्दात् कोङ्त्वात् ष्णे सिद्धे नृतत्स्थयोरिति णकबाधनार्थः पाठः। कच्छादेर्देश एवाभिधानात्। पलद्यादेस्तावत्—पालदः पारिखः। पलद्यादिर्यथा—

पलदौ परिखा गोष्ठी पर्षद्वाहीकपर्व्वताः।
फलकीटः शूरसेनो बहुकीटः पटच्चरः।
तच्चोदपानलोमानि गोमती कमलभिदा।

सन्धिवेला यक्नत् सन्ध्या पौर्णमासी त्रयोदशी।
अमावस्या त्वमावास्या नैकती प्रतिपत् शरत्।
पुरं वनं गिरिः पञ्चदशी संवत्सरः फले।
पर्व्वण्यपि पलद्यादौ शेषं शिष्टप्रयोगतः॥

गोष्ठीनैकतीगोमतीशब्दानां वाह्रीकग्रामत्वात् प्रसक्तयोर्णिक-ष्णिकयोर्बाधक ईदन्तलक्षण-णको बाध्यते। वाह्रीकशब्दस्य कोङ्-त्वात् ष्णे सिद्धे अत्र पाठ एवं ज्ञापयति येषां लक्षणानां वृद्धावृद्ध-सामान्यविषयस्तेषां लक्षणानां वृद्धविहित ईयो बाधको भवति, तेन औलुके भव औलुकीयः, वाह्रकरूपे भवः वाह्रकरूपीयः इत्यादौ कोङ्ष्णं बह्वचोऽन्तोदात्तादुदीच्यग्रामादिति ट्णं च बाधित्वा ईय एव भवति। सन्धिवेला सन्ध्या पौर्णमासी त्रयोदशी अमावस्या अमावास्या प्रतिपत् पञ्चदशीशब्दानां पाठः काल-ष्णिकबाधनार्थः। शरच्छब्दस्येह वेणुकादौ च पाठात् शारदः शारदीयः। पुरवनगिरीणाम् इह नद्यादौ च पाठात् पौरः पौरेयः वानः वानेयः गैरः गैरेयः इति। सांवत्सरं फलं, सांवत्सरं पर्व्व, अन्यत्र सांवत्सरिकमृणम्। शेषाणामुदीच्यग्रामत्वात् प्राप्तट्ण बाधनार्थः पाठः।

प्रस्थोत्तरदात्। प्रस्थोत्तरदाच्छब्दात् ष्णः स्याञ्चवादौ। माद्रीप्रस्थः माहकिप्रस्थः, बह्वचोऽन्तोदात्तादुदीच्यग्रामादिति प्राप्तट्णो बाध्यते।

निवासात् पृथ्वीमध्यान्मध्यमश्च चरणे। चरणे वाच्ये निवास-वाचकात् पृथ्वीमध्यशब्दात् ष्णः स्यात्, तस्मिन् मध्यमादेशश्च।

पृथ्वीमध्ये निवासोऽस्य माध्यमः कठः। अनिवासस्य तु पृथ्वीमध्यादागतः मध्यमीयः कठः, पृथ्वीमध्यस्य मध्यमश्चेति ईयस्य बाधकमिदम्। चरण इति किं? मध्यमीयः शूद्रः।

युष्मदस्मदो वा णीनश्च। आभ्यां णो णीनश्च वा स्याञ्ञवादौ। ढञादीयस्यापवादः। यौष्माकः यौष्माकीणः, पक्षे युष्मदीयः। एवम् आस्माकः आस्माकीनः अस्मदीयः। ननु ढाधिकारो धादित्यतः प्राक्, तत् कथं ढाधिकारे भवादिनिरूपणमिति चेत् सत्यम्। भवादिपठितगच्छत्यादयर्थे ढान्तात् भवादित्या भवन्ति, अतएव प्रसङ्गादुक्तमिति।

गच्छति पथिदूतयोः। ढादिति वर्त्तते। गच्छतीत्यर्थे यथाविहितं त्यः स्यात्, यो गच्छति स चेत् पन्था दूतो वा भवति। शुभ्रं गच्छति पन्था दूतो वा शौभ्रः पन्था दूतश्च। ढात् चेत्यः। माथुरः कान्यकुब्जः वाराणसेयः राष्ट्रिय इत्यादि। पथिदूतयोरिति किं? मथुरां गच्छति साधुः।

अभिनिष्क्रामति द्वारं। ढादित्येव। अभिनिष्क्रामतीत्यर्थे यथाविहितं त्यः स्यात्, यन्निष्क्रामति तत् द्वारं चेद्भवति। शुभ्रमभिमुखेन निष्क्रामति द्वारं शौभ्रं द्वारम्। एवं माथुरं कान्यकुब्जं वाराणसेयं राष्ट्रियमित्यादि। द्वारं निष्क्रमणक्रियायाः साधनत्वेन प्रसिद्धं, तदिह स्वातन्त्र्येण विवक्ष्यते, यथा साध्वसिस्छिनत्ति। द्वारमिति किं? मथुरामभिनिष्क्रामति पुरुषः।

अधिकृत्य कृतो ग्रन्थः। ढादित्येव। अधिकृत्य एतदपेक्षया ङी। अधिकृत्य आरभ्य अभिप्रेत्य इत्यर्थः। अधिकृत्येत्यस्मिन्नर्थे

यथाविहितं त्यः स्यात्, यः कृतः स ग्रन्थश्चेज्जवति । सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रो ग्रन्थः । ग्रन्थ इति किं ? सुभद्रामधिकृत्य कृतः प्रासादः ।

आख्यायिकाभ्यो लुब्बहुलम् । आख्यायिकाभ्योऽधिकृत्य कृतो ग्रन्थ इत्यर्थे उत्पन्नस्य त्यस्य बहुलं लुप् स्यात् । वासवदत्तामधिकृत्य कृतो ग्रन्थः वासवदत्ता सुमनोज्ञवा उर्व्वशी । बहुलं किं ? भैमरथः ।

सीतान्वेषणादेरीयः । ढात् सीतान्वेषणादेरधिकृत्य कृतो ग्रन्थ इत्यर्थे ईयः स्यात् । षस्यापवादः । सीतान्वेषणीयः । सीतान्वेषण-यमसभं रक्षोऽसुर-गुणमुख्यावपि शिशुक्रन्दः । शिशुक्रन्दो नाम रोगः ।

अदेवासुरादेश्चे । देवासुरादिभिन्नादधिकृत्य कृतो ग्रन्थ इत्यर्थे ईयः स्यात् चे से सति । श्येनकपोतीयो ग्रन्थः, किरातार्ज्जुनीयः, सर्व्वार्थसम्बन्धीयः । देवासुरादेस्तु दैवासुरः राक्षोगन्धर्व्व इत्यादि । परे तु रक्षोऽसुर-गुणमुख्यशब्दौ देवासुरादौ प्रद्युम्नागमनशब्दं सीतान्वेषणादौ पठन्ति । तेषां मते राक्षोऽसुरं गौणमुख्यं प्रद्युम्नागमनीयम् । येषां द्वन्द्वसमासे ईयप्रतिषेधधस्ते च देवासुरादौ द्रष्टव्याः ।

ष्णिको रक्षत्यादौ । ढादित्येव । रक्षतीत्याद्यर्थेषु ष्णिकः स्यात् । समाजं रक्षति सामाजिकः । ढात् चे त्यः । रक्षति उक्षति वर्त्तते वक्ति धारयते गृह्णाति समवैति हन्ति तिष्ठति प्रयच्छति करोति चरति पश्यति वर्त्तयति आह अनुपृच्छति

गच्छति अधीष्टः भृतः भृतः भावी अर्हति नित्यमर्हति पचति सम्भवति अवहरति वहति हरति आवहति। एवं शाकानुञ्छति शाकिकः।

प्रतीपादेर्वर्त्तते। ढात् प्रतीपादेर्वर्त्ततेऽर्थे ष्णिकः स्यात्। यद्यपि हृतधीरकर्मकत्वात् ढाभावस्तथापि धुविशेषणत्वात् ढसंज्ञा। प्रतीपं यथा स्यात्तथा वर्त्तते प्रातीपिकः। प्रतीपादिर्यथा—

प्रतीपः प्रतिकूलश्च प्रतिलोमानुलोमनौ।
परिपार्श्वान्वीपपरिमुखानुकूलमित्यपि॥

प्रभूतादेर्वक्ति। ढात् प्रभूतादेर्वक्तीत्यर्थे ष्णिकः स्यात्। प्रभूतं यथा तथा वक्ति प्राभूतिकः। प्रभूतादिर्यथा—

प्रभूतः प्रतिभूतोऽत्र पर्य्यासेन सहेरिताः।
माशब्दो नित्यशब्दश्च कार्य्यशब्दस्तथेति षट्॥

पदव्यादेस्तद्धावति। ढात् पदव्यादेस्तद्धावतीत्यर्थे ष्णिकः स्यात्। पदवी वर्त्म, पदवीं धावति पादविकः। पदस्य पश्चादनुपदं तत् धावति आनुपदिकः। आक्रन्दत्यस्मिन् आक्रन्दो देशः, तं धावति आक्रन्दिकः।

माथोत्तरदाच्च। ढान्माथशब्दोत्तरदाद्धावतीत्यर्थे ष्णिकः स्यात्। दण्डमाथं (१) धावति दाण्डमाथिकः शौल्कमाथिकः। माथशब्दः पथिपर्य्यायः।

---

(१) दण्डाकारो माथः पन्था दण्डमाथः।

पदोत्तरदात् गृह्णाति । ढात् पदोत्तरदात् गृह्णातीत्यर्थे ण्विकः स्यात् । पौर्व्वपदिकम् । उभयत्र उत्तरदग्रहणं वहुत्वे निषेधार्थम् (१) ।

अर्थललामप्रतिकण्ठाच्च । ठेभ्य एभ्यो गृह्णातीत्यर्थे ण्विकः स्यात् । अर्थं गृह्णाति आर्थिकः, लालामिकः । कण्ठं कण्ठं प्रति प्रतिकण्ठं, तत् गृह्णातीति प्रातिकण्ठिकः ।

समूहार्थात् समवैति । ढात् समूहार्थात् समवैति इत्यर्थे ण्विकः स्यात् । समूहं समवैति सामूहिकः सामवायिकः ।

ण्यः परिषदो, वा तु सेनायाः । ढात् परिषच्छब्दात् समवैतीत्यर्थे ण्यः स्यात्, ण्विकस्यापवादः, सेनायास्तु वा । परिषदं समवैति पारिषद्यः, सेनां समवैति सैन्यः सैनिकः ।

मृगमत्स्यपक्षिभ्यो हन्ति । व्वनिर्देशः स्वरूपविधेर्निरासार्थः । ढेभ्यो मृगमत्स्यपक्षिवाचिभ्यो हन्तीत्यर्थे ण्विकः स्यात् । मृगं हन्ति मार्गिकः, रौरुकः, शौकरिकः । नैयङ्कुकः, श्वापदन्यङ्कोस्तु वेति वा युम्, पक्षे न्याङ्कुकः, इकस्य कः । मात्स्यिकः शाकुनिकः प्रौष्ठिकः पाक्षिकः हारीतिकः मायूरिकः । पातकः, तान्तादिकस्य कः ।

परिपथात्तिष्ठति च परिपन्थश्च । ढात् परिपथात् हन्तीत्यर्थे तिष्ठतीत्यर्थे च ण्विकः स्यात्, तस्मिन् परिपथस्य परिपन्थादेशश्च । परिपथं हन्ति तिष्ठति वा पारिपन्थिकश्चौरः, पन्थानं

---

(१) अत्र दान्तादित्यनुवृत्तौ पदोत्तरदादिति ग्रहणं वहुप्रत्यये निषेधार्थमिति भावः ।

परिव्रज्य हन्ति तिष्ठति वेत्यर्थः। परिपथपर्य्यायः परिपन्थ-शब्दोऽस्तीति वृत्तिकारः।

निन्द्यात् प्रयच्छति। शास्त्रोक्तव्यवहाराद्विरुद्धव्यवहारो निन्द्यः, तस्मात् ढात् प्रयच्छतीत्यर्थे षिकः स्यात्। द्विगुणार्थं द्रव्यं द्विगुणं, द्विगुणं प्रयच्छति द्वैगुणिकः। यदा उत्तमर्णः एकद्रव्यं द्विगुणार्थं कृत्वा प्रयच्छति पश्चात्तद्ददयति तदा द्विगुणं निन्द्यं, यदा त्वेकगुणं प्रयच्छति पश्चाद्विगुणं गृह्णाति तदा न द्विगुणं निन्द्यं शास्त्रविहितत्वात्। एवं त्रैगुणिकः।

वृधुषश्च वृद्धेः। निन्द्याद्वृद्धिशब्दात् ढात् प्रयच्छतीत्यर्थे षिकः स्यात् वृद्धिशब्दस्य वृधुषादेशश्च। वृद्ध्यर्थं द्रव्यं वृद्धिः, वृद्धिं प्रयच्छति वार्द्धुषिकः। यद्यपि वृद्धिशब्दपर्य्यायो वृधुषीशब्दोऽप्यस्ति तथापि वृद्धिशब्देनानिष्ट-निवारणार्थमिदम्।

कुसीददशैकादशाभ्यां षिकः। निन्द्यात् कुसीदशब्दात् ढात् दशैकादशशब्दाच्च प्रयच्छतीत्यर्थे षिकः स्यात्। कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं, तत्प्रयच्छति कुसीदिकः। दशशब्दो दशार्थे वर्त्तते, एकादशशब्द एकादशार्थोऽपि उपचारात् दशसु वर्त्तते, अतः सामानाधिकरण्यात् दश च ते एकादश चेति यसः, दशैकादश प्रयच्छति दशैकादशिकः दशैकादशिकी, दश एकादशार्थं प्रयच्छतीत्यर्थः (१)।

---

(१) दशसंख्यैव एकादशसंख्या येषामर्थानां तान् प्रयच्छति दशैकादशिकः। दशसंख्यकान् ददेकादशसंख्यकान् प्रतारणया बोधयति, परिशोधनवेलायामेकादशसंख्यकग्रहणायेति निन्द्यत्वमिति वृहन्मुग्धबोधम्।

शब्ददर्दुराभ्यां करोति । आभ्यां करोतीत्यर्थे ष्णिकः स्यात् । शब्दं करोतीति शाब्दिको वैयाकरणः, दार्दुरिकः कुलालः । दर्दुरो वान्दभाण्डविशेषः, भाण्डसंस्कारकाले दर्दुरं शब्दविशेषं करोति इति रक्षितः ।

धर्म्मादेश्चरति । ढात् धर्म्मादेश्चरतीत्यर्थे ष्णिकः स्यात् । धर्म्मं चरति धार्म्मिकः । चरणमत्र सेवा, तेन कदाचिदाचरणे मा भूत् । धर्म्मादिर्यथा—

धर्म्माधर्म्मौमहानाम्नी गोदानसहितास्तथा ।
आदित्यव्रतमित्येते पञ्चेह समुदीरिताः ॥

अवान्तरदीक्षादेर्डिन् । ढादवान्तरदीक्षादेर्डिन् स्यात् चरतीत्यर्थे । अवान्तरदीक्षां चरति अवान्तरदीक्षी ।

त्वयोऽवान्तरदीक्षात्र देवव्रत-तिलव्रतम् ।

अष्टाचत्वारिंशतो डकश्च । ढादष्टाचत्वारिंशच्छब्दात् चरतीत्यर्थे डिन् डकश्च स्यात् । ष्णिकस्यापवादः । अष्टाचत्वारिंशद्वर्षाणि व्रतं चरति अष्टाचत्वारिंशी अष्टाचत्वारिंशकः ।

चातुर्म्मास्यानां यलोपश्च । चातुर्म्मास्यशब्दात् चरतीत्यर्थे तौ स्यातां, तयोर्यलोपश्च । चातुर्म्मास्यानि व्रतानि चरति चातुर्म्मासी चातुर्म्मासकः ।

नाम्नि ललाटकुक्कुटाभ्यां पश्यति । ढाभ्यामाभ्यां पश्यतीत्यर्थे ष्णिकः स्यात् संज्ञायाम् । ललाटं पश्यति लालाटिकः, यः सेवकः शिष्यो वा प्रसादचिह्नज्ञानाय प्रभोर्गुरोर्वा ललाटमेव पश्यति, यः सेवकः शिष्यो वा कार्य्याक्षमः सोऽभि

धीयते (१)। कुक्कुटशब्देन कुक्कुटपातयोग्यदेशोऽभिधीयते, तं देशं पश्यति कौक्कुटिको भिक्षुः, यः कुक्कुटपातयोग्यमल्पतरदेशं पश्यन् गच्छति स इत्यर्थः।

पारायण-तुरायण-चान्द्रायणेभ्यो वर्त्तयति। ढेभ्य एभ्यो वर्त्तयतीत्यर्थे ष्णिकः स्यात्। पारायणं वेदस्य शास्त्रस्य वा समस्ताध्ययनकर्म्म, तुरायणं (२) यज्ञविशेषः, चान्द्रायणं व्रतविशेषः, संज्ञायामुत्तरदस्य नो णः। पारायणं वर्त्तयति पारायणिकः। यद्यपि पारायणं शिष्ये गुरौ च वर्त्तते, तथापि शिष्ये एव त्य इति न्यासः। एवं तौरायणिको यजमानः, न तु याजकः। चान्द्रायणिकस्तपस्वी।

तदन्ताच्च (३)। द्वैपारायणिकः द्वैतुरायणिकः द्वैचान्द्रायणिकः।

संशयादापन्ने। ढात् संशयशब्दात् आपन्नेऽर्थे ष्णिकः स्यात्। संशयः सन्देहः, तमापन्नः सांशयिकः संशयवानिति। न्यासकारस्तु संशय्यमाने स्थाण्वादौ त्यमुत्पादयति, न तु संशयितरीति, तद्वचनामसम्मतम्। अतएव "सांशयिकः संशयापन्नमानस" इत्यमरः (४)।

---

(१) "खालाटिकः प्रभोर्भावदर्शी कार्य्याच्चमच्च य" इत्यमरः।

(२) संक्षिप्तसारे तुरायणमित्यत्र उत्तरायणमिति पाठः (७३८सू)।

(३) पारायणाद्यन्ताच्च शब्दात् वर्त्तयतीत्यर्थे ष्णिकः स्यादित्यर्थः।

(४) स्थाणुर्वा पुरुषो वेति संशयविषयीभूते स्थाण्वादावेव प्रत्यय दृश्यते न तु सन्देग्धरीति भावः। कथं तर्हि "सांशयिकः संशयापन्नमानस" इति चेदत्राऽऽहः।

सुस्नातादेः पृच्छति । ढात् सुस्नातादेः पृच्छतीत्यर्थे णिकः स्यात् । सुस्नातं पृच्छति सौस्नातिकः सौखसुप्तिकः । सुस्नातादिरत्र सुप्तिशय्यारात्रय: सुखशब्दात् ।

योजनादेर्गच्छति । ढात् योजनादेर्गच्छतीत्यर्थे णिकः स्यात् । योजनं गच्छतीति यौजनिकः । योजनादिर्यथा—

योजनं गुरुतल्पञ्च दारा गुरोः परादपि (१) ।
शतं क्रोशात् योजनाच्च (२) बुधैरत्र षड़ीरिताः ॥

पथः षिकः । ढात् पथिशब्दात् गच्छतीत्यर्थे षिकः स्यात् । पन्थानं गच्छतीति पथिकः । स्त्रियां पथिकी ।

नित्यं णः पन्थश्च । ढात् पथो नित्यं गच्छतीत्यर्थे णः स्यात्, तस्मिन् पन्थादेशश्च । पन्थानं नित्यं गच्छति पान्थः । स्त्रियां पान्था ।

कालेभ्योऽधीष्टभृतभूतभाविषु । व्यनिर्देशः स्वरूपविधेर्निरासार्थः । ढेभ्य एभ्यः कालवाचिभ्योऽधीष्टे भृते भूते भाविनि चार्थे णिकः स्यात् । अधीष्टः सत्कृत्य व्यापारितः, भृतो वेतनेन क्रीतः, भूतः सत्तया व्याप्तकालः, भावी सत्तयाऽव्याप्तकालो भविष्यति यः । सदाध्वादीति ढं, मासम् अधीष्टो मासिकोऽध्यापकः । मासं भृतः मासिकः भृत्यः । मासं भूतो मासिको व्याधिः । मासं भावीति मासिक उत्सवः । नन्वध्येषणभरणे

संशयापन्नं मानसं यस्मिन् विषये स विषयः संशयापन्नमानस इति । इति तत्त्वबोधिनी ।

(१) गुरुदार, परदार इत्यर्थः । (२) क्रोशशत, योजनशत इत्यर्थः ।

मुहूर्त्तं व्याप्य क्रियते, तत् कथं ताभ्यां मासो व्याप्यते इति उच्यते—यदर्थं हि ते क्रियेते तत्फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामपि व्याप्यत इत्युच्यते उपचारात्। संख्याशब्दोऽपि यदा काले संख्येये वर्त्तते तदापि त्यः। द्वे षष्टी भूतो भावी वा द्विषाष्टिकः द्विसाप्ततिकः, सुपञ्चालादित्वादुत्तरदस्य त्रिः।

मासात् य-ष्णीनौ वयसि। ढान्मासाद्वयस्यभिधेये एष्वर्थेषु यःष्णीनौ स्याताम् (१)। मासं भूतो भावी वा मास्यः मासीनः माणवक इति पुरुषोत्तमः। परे भूतेऽर्थे अभिधानमित्याहुः (२)। वयसीति किं? मासिकः कर्म्मकरः।

गाद्यः। ढात् क्रतगात् मासाद्वयस्यभिधेये यः स्यात्। द्वौ मासौ भूतः द्विमास्यः।

षण्मासाण्ण्यष्णिकौ च। ढात् क्रतगात् षण्मासात् वयस्यभिधेये भूताद्यर्थे ण्य ष्णिक य एते स्युः। षण्मासान् भूतः षाण्मास्यः षाण्मासिकः षण्मास्यः। विधानसामर्थ्यात् नेको लुक्।

इक-ण्याववयसि। ढात् क्रतगात् षण्मासात् वयोभिन्ने भूतेऽर्थे इक-ण्यौ स्याताम्। षण्मासिकः षाण्मास्यो रोगः।

---

(१) यद्यपि एष्वर्थेषु इत्युक्तौ अधीष्टादयश्चत्वारोऽनुवर्त्तन्ते तथापि योग्यतया यथासम्भवमनुवृत्तिः स्यात्, तेनात्र अधीष्टभृतयोर्नानुवृत्तिः। एवं परत्रापीति।

(२) अधीष्टादीनां चतुर्णामधिकारेऽपि सामर्थ्याद्भूत इत्येव सम्बध्यते। न हि मासमधीष्टो भृतो वेत्याद्युक्तौ काचित् कालकृता शरीरावस्था गम्यते इति तत्त्वबोधिनी।

समाया ईनो, गात्तु वा। ढात् समाशब्दात् ईनः स्यात्, क्षतगात्तु वा, एष्वर्थेषु। समामधीष्टो भृतो भूतो भावी वा समीनः। गात्तु—द्वे समे अधीष्टो भृतो भूतो भावी वा द्विसमीनः, पक्षे द्वैसमिकः।

गाद्रात्राहःसंवत्सरादीन-ष्णिकौ, वर्षात्तु लुक् च वा, चित्तवति नित्यम्। ढेभ्य एभ्यः क्षतगेभ्य ईन-ष्णिकौ स्यातां एष्वर्थेषु, वर्षात्तु वा लुक्, चित्तवति तु नित्यम्। द्वे रात्री अधीष्टो भूतो भावी वा द्विरात्रीणः द्वैरात्रिकः। द्वाहीनः द्वैयह्निकः। द्विसंवत्सरीणः द्विसांवत्सरिकः, सुपश्चालादित्वात् उत्तरदस्य त्रिः। द्विवर्षीणः द्विवार्षिकः द्विवर्षः, अभविष्यति संख्यादिर्वर्षमिति परदस्य त्रिः। भविष्यति तु द्वे वर्षे भावी द्वैवर्षिकः। द्विवर्षो वत्सः, नित्यं तयोर्लुक्। चित्तवतीति किं? द्विवर्षीणो द्विवार्षिको द्विवर्षो व्याधिः।

अर्हति। ढात् अर्हतीत्यर्थे ष्णिकः स्यात्। वस्त्रमर्हति वास्त्रिकः श्वेतच्छत्रिकः।

दण्डादेर्यः। ढाद्दण्डादेरर्हतीत्यर्थे यः स्यात्। दण्डमर्हति दण्ड्यः कश्यः। दण्डादिर्यथा—

दण्डः कशा वधो मेधा मेधार्घौ मुसलं धनम्।
मधुपर्कं द्रभो वंशः भागोदक युगं पणः॥

कड़ङ्गर-स्थालीविल दक्षिणाभ्य ईयश्च। ढेभ्य एभ्योऽर्हतीत्यर्थे ईयो यश्च स्यात्। कड़ङ्गरमर्हति कड़ङ्गरीयः कड़ङ्गर्यः (१)।

---

(१) पाणिनिसूत्रे कड़ङ्कर इत्येव (५।१।६६)। कड़ङ्करो मापादेः काष्टभागः

स्थालीविलीयः स्थालीविल्यः (१) दक्षिणीयः दक्षिण्यः। पात्रादेय-यौ। ढात् पात्रशब्दादर्हति इत्यर्थे य एयश्च स्यात्। पात्रमर्हति पात्र्यः पात्रेयः।

यज्ञर्त्विग्भ्यामिय-णीनौ कर्म्मार्हति च। ढाभ्यामाभ्याम् अर्हति कर्म्मार्हति चेत्यर्थे इय-णीनौ क्रमात् स्याताम्। यज्ञमर्हति यज्ञकर्म्मार्हति वा यज्ञियो ब्राह्मणः देशश्च। ऋत्विजमर्हति ऋत्विक्कर्म्मार्हति वा आर्त्विजीनः यजमानः ऋत्विक् च।

छेदादेर्नित्यमर्हति। ढाच्छेदादेर्नित्यमर्हति इत्यर्थे ष्णिकः स्यात्। छेदं नित्यम् अर्हति छैदिकः (२) भैदिकः। छेदादिर्यथा—

छेदो भेदस्तथा द्रोहो नर्त्तकर्षे ष्णिको भवेत्।
विरागस्य विरङ्गो(३)ऽथ संप्रयोगश्च संप्रति।
संप्रेषणश्च संप्रश्नो दशेह परिकीर्त्तिताः॥

विरागं नित्यमर्हति वैरङ्गिकः, ष्णिके विरङ्गे।

शिरश्छेदात् यश्च शिरः शीर्षः। ढात् शिरश्छेदशब्दात् नित्यमर्हति इत्यर्थे ष्णिको यश्च स्यात्, तस्मिन् परतः शीर्षादेशश्च शिरश्छेदं नित्यमर्हति शैर्षच्छेदिकः दण्डः।

(कुँड़ा, भूषी इति भाषा)। कड़ङ्गरीवो गौः [illegible] रिति रघुः।

(१) स्थालीविलं स्थाल्या [illegible] इति गोयीचन्द्रः। पाकयोग्या [illegible]

(२) छैदिको वेतसः, चिह्न[illegible] प्रतिपादनपरमेतत्—इति गोपीचन्द्रः [illegible] मास्तु इति तदाशय इति [illegible]

(३) विरागशब्देन [illegible]

पचति सम्भवत्यवहरति च । ढादेतेष्वेर्थेषु ष्णिकः स्यात् । सम्भवत्यर्थोऽत्र सम्भवः आधेयस्य प्रमाणानतिरेकः । तथाच—

"सम्भवः कथितो हेतावुत्पत्तौ मेलकेऽपि च ।
आधारानतिरिक्तत्वे आधेयस्य च सम्भव" ॥ इति विश्वः ।

अवहरत्यर्थोऽवहरणं संहरणमित्यर्थः । प्रस्थं पचति सम्भवति (१) अवहरति वा प्रास्थिकः कौडविकः कटाहः । यद्यपि प्रस्थं पचति चरुं प्रास्थिक इत्यत्र पाकेऽपि सम्भवो विद्यते, तथापि प्रस्थं पचति ब्राह्मणी प्रास्थिकीत्यत्र सम्भवत्यर्थेन विनापि पचत्यर्थदर्शनात् पृथक् पचतिग्रहणम् ।

पात्राऽऽचिताऽऽढक-विस्तादीनो वा । ढेभ्य एभ्य एष्वर्थेषु ईनः स्याद्वा । पात्रं पचति सम्भवत्यवहरति वा पात्रीणा । एवं आचितीना आढ़कीना विस्तीना (२) स्थाली । पक्षे पात्रिकीत्यादि ।

गात् ष्किश्च वा । ढेभ्यः कृतगेभ्यः पात्रादिभ्यः ष्किक ईनश्च स्याद्वा एष्वर्थेषु । द्वे पात्रे पचति सम्भवति अवहरति वा द्विपात्रिकी द्विपात्रीणा, द्व्याचितिकी द्व्याचितीना, द्व्याढ़किकी द्व्याढ़कीना; द्विविस्तिकी द्विविस्तीना । पक्षे ष्णिकस्य वाच्ये लुकि (३) "तार्थे माना"दित्यादिना ईपि द्विपात्री द्व्याढ़की । आचितविस्ताभ्यान्तु अजादित्वात् द्व्याचिता द्विविस्ता आप्, न ङीप् । पूर्वत्रयाणां (४) ष्किष्णिकयोर्न विशेषः । पृथग्योग उत्तरार्थः ।

---

(१) स्वस्मिन् समावेशयति ।

(२) आचितं दशभारपरिमाणम् । विस्तं तोलकमानम् ।

(३) वक्ष्यमाणसूत्रेणेति शेषः । (४) पात्राचिताढ़कानाम् ।

कुलिजाल्लुक्षिकष्णिकैनाः। ढात् कृतगात् कुलिजात् लुक् षिक ष्णिक ईन एते स्युः एष्वर्थेषु। द्विकुलिजी, "तार्थे माना" दितीप्, द्विकुलिजिकी द्वैकुलिजिकी द्विकुलिजीना।

वंशादिभ्यो भाराद्वहत्यादौ (१)। ढात् वंशादिपूर्ब्बभाराद्वहति इत्याद्यर्थे लुक् षिकः ष्णिक ईनः स्यात्। वंशभारं वहति हरति आवहति वा वांशभारिकः वाल्वजभारिकः।

वंश वल्वज मूलेषु स्थूणाच्च कुटजाः कुटः।
अश्मा खड्गा दश प्रोक्ता वंशादिरिह कोविदैः॥

केचिद्भारशब्दस्यार्थद्वारेण वंशादीनां विशेषणाद्भारभूतेभ्यो वंशादिभ्य इत्यर्थः, तेन भारभूतान् वंशान् वहति वांशिकः वाल्वजिक इत्याहुः। वहति उत्क्षिप्य धारयति। हरति देशान्तरं प्रापयति। आवहति उत्पादयतीत्यर्थः।

द्रव्य-वल्लाभ्यां केकौ। ढाभ्यामाभ्यां क्रमात् क इक इत्येतौ स्याताम् एष्वर्थेषु। द्रव्यं वहति हरति आवहति वा द्रव्यकः वल्लिकः (२)।

अर्हत्यादौ शताद्यैकावशते। ढाच्छतशब्दात् अर्हतीत्याद्यर्थेषु य इक इत्येतौ स्यातां, न तु शते। शतमर्हति पचति सम्भवति अवहरति वहति वा शत्यः शतिकः कम्बलः। अशत इत्युक्तेर्यत्र प्रकृत्युक्तसंख्यायास्त्यवाच्यस्य संख्येयत्वं भवति तत्र न स्यात्।

---

(१) आदिपदेन हरति आवहति इत्येतयोर्ग्रहणम्।

(२) वल्लशब्दो मूल्यवाची इति गोयीचन्द्रः (६३४सू)।

तेन शतमध्यायाः परिमाणमस्य शतकं निदानमित्यादौ प्रकृत्या शतशब्देन उक्तायाः संख्यायास्त्यवाच्यस्य निदानस्य संख्येयत्वात्तौ न स्यातामिति। शत्यः शतिकः कम्बल इत्यादौ त्यवाच्यस्य कम्बलस्य न संख्येयत्वं किन्तु येन क्रीतस्तस्यैवेति।

संख्याया अ-ति-शदन्तायाः कः। ढात् त्यन्त-शदन्तवर्जात् संख्यावाचकात् कः स्यादर्हत्यादौ। पञ्चकः बहुकः गणकः। अ-ति-शदन्ताया इति किं? सामतिकः चत्वारिंशत्कः, तादिकस्य कः। अचार्थवतस्तिशब्दस्य वर्ज्जनात् डतेरप्रतिषेधस्तेन कतिकः।

विंशति-त्रिंशद्भ्यां चासंज्ञायान्तु डकः। ढाभ्यामाभ्याम् अर्हत्यादौ कः स्यात्, असंज्ञायान्तु डकः। विंशतिकः त्रिंशत्कः। असंज्ञायान्तु विंशकः त्रिंशकः।

वतोः कस्येम् वा। वत्वन्तात् कस्य इम् वा स्यात्, म इत्। यावतिकः यावत्कः तावतिकः तावत्कः।

कंसार्द्राभ्यां षिकः। ढाभ्यामाभ्यां षिकः स्यात् अर्हत्यादौ। कांसिकः कांसिकी (१) आर्द्रिकः आर्द्रिकी।

कार्षापणाद्वा तु प्रतिश्च। ढात् कार्षापणात् षिकः स्यात् अर्हत्यादौ, तस्मिन् प्रतिरादिश्यते वा। कार्षापणिकः प्रतिकः।

वसन-सहस्र-शतमान-विंशतिकात् ष्णः। ढेभ्य एभ्यः ष्णः स्यात् अर्हत्यादौ। वासनं साहस्रं शातमानं वैंशतिकम्।

---

(१) चतुःषष्ट्या पलैः कंस इति गोयीचन्द्रः (६५२सू)।

शूर्पात् ट्णो वा। ढात् शूर्पात् ट्णो वा स्यादर्हत्यादौ। ष्णिकस्यापवादः। शौर्पः (१) पक्षे शौर्पिकः।

गादध्यर्धादेरसंज्ञायां लुक्। ढात् क्रतगात् अध्यर्धपूर्वाच्चार्हत्यादौ ये विहितास्त्यास्तेषाम् असंज्ञायां लुक् स्यात्। द्विकंसम् अध्यर्धकंसम् (२) द्विशूर्पं अध्यर्धशूर्पम्। असंज्ञायामिति किं? पाञ्चलोहितिकं (३) पाञ्चकलापिकम्, अत्र त्यान्तं नाम इति (४)।

सहस्र-शतमान-सुवर्ण-कार्षापणेभ्यो वा। ढेभ्य एभ्यः क्रतगेभ्योऽध्यर्धपूर्वेभ्यश्च अर्हत्यादौ विहितानां त्यानां लुक् स्याद्वा। द्विसहस्रम् अध्यर्धसहस्रं द्विशतमानम् अध्यर्धशतमानं द्विसुवर्णम् अध्यर्धसुवर्णं द्विकार्षापणम् अध्यर्धकार्षापणम्, पक्षे द्विसाहस्रम् अध्यर्धसाहस्रं द्विशातमानम् अध्यर्धशातमानं द्विसौवर्णम् अध्यर्धसौवर्णं, सुपञ्चालादित्वात् अन्त्यस्य दस्य त्रिः। द्विकार्षापणिकम्। द्विप्रतिकम्, एवमध्यर्धकार्षापणिकम् अध्यर्धप्रतिकम् (५)।

विंशतिकादीनः। ढात् क्रतगात् अध्यर्धपूर्वाच्च विंशतिकादीनः स्यात् अर्हत्यादौ। द्विविंशतिकीनः अध्यर्धविंशतिकीनः; लुग्बाध्यते।

---

(१) शूर्पशब्दः परिमाणवाचीति गोयीचन्द्रः (६५७सू)।

(२) अध्यर्धं—अध्यारूढमर्धं यस्मिन् तत्, सार्धैकमित्यर्थः।

(३) पञ्च लोहिन्यो गुञ्जाः परिमाणमस्येति विग्रहे लोहिनीशब्दस्य पुंवद्भावेन लोहितरूपापत्त्या सिद्धमिति बृहन्मुग्धबोधम्।

(४) परिमाणविशेषस्य नामधेये एते इति तत्त्वबोधिनी।

(५) कार्षापणाद्वा तु प्रतिश्च इति कार्षापणशब्दस्य वा प्रतिरादिश्यते।

पाद-पण-माषात् यो वा तु शत-शाणात् । ढेभ्यः क्षतगेभ्यो-ऽध्यर्द्धपूर्व्वेभ्यश्च एभ्यो यः स्यात् अर्हत्यादौ, शत-शाणाभ्यान्तु वा । द्विपार्द्यं (१) द्विपण्यं द्विमाष्यम् अध्यर्द्धपाद्यम् अध्यर्द्धमाष्यम् । शतशाणादेस्तु द्विशत्यम् अध्यर्द्धशत्यं पञ्चशाण्यम् अध्यर्द्धशाण्यं, पक्षे द्विशतम् अध्यर्द्धशतं पञ्चशाणम् अध्यर्द्धशाणम् ।

खारी-काकिनीभ्यामीकः केवलाभ्याञ्च । ढाभ्यां क्षतगाभ्याम् आभ्याम् अध्यर्द्धपूर्व्वाभ्यां केवलाभ्याञ्चार्हत्यादौ ईकः स्यात् । द्विखारीकः अध्यर्द्धखारीकः द्विकाकिनीकः अध्यर्द्धकाकिनीकः खारीकः काकिनीकः ।

द्विगेः शाणात् ष्णो वा । द्वि त्रि-पूर्व्वात् शाणात् अर्हत्यादौ ष्णो वा स्यात् । द्वैशाणं त्रैशाणं, पक्षे पूर्व्वेण वा यञ्च, द्विशाण्यं, त्रिशाण्यम्, उभयत्यक्षपक्षे लुक्, द्विशाणं त्रिशाणमिति ।

वहीञ्च निष्क-विस्तात् णिको वा । ढात् द्वि-त्रि-बहुपूर्व्वात् निष्कात् विस्ताच्च णिको वा स्यात् अर्हत्यादौ । द्विनैष्किकं त्रिनैष्किकं बहुनैष्किकं, द्विवैस्तिकं त्रिवैस्तिकं बहुवैस्तिकं, पक्षे द्विनिष्कं त्रिनिष्कं बहुनिष्कं द्विविस्तं त्रिविस्तं बहुविस्तम् ।

उक्तो रक्षत्यादिः ।

युग-रथ-प्रासङ्गात् यो वहति। ढेभ्य एभ्यो वहत्यर्थे यः स्यात् ।

---

(१) अत्र पादशब्दस्य परिमाणवाचकस्यैव ग्रहणान्न पादेगः। पादेग-द्विपौ, चरणवाचकस्यैव ग्रहणात्—इति दृढदुग्धबोधेऽस्मिन्नौद्धत्यमत्रेक्ष्यम् ।

युगं वहति युग्यः रथ्यः प्रासङ्ग्यः (१)। गादपि—द्वियुग्यः द्विरथ्यः, द्विप्रासङ्ग्यः।

नाम्नि तु जनात्। ढाज्जनशब्दात् वहत्यर्थे यः स्यात् संज्ञायाम्। जनं वहति जन्यो वरस्निग्धः (२)। जनीशब्दाद्धूवाचकादृय इति जयादित्यः।

धुरः ष्णेयेनौ च। ढात् धुर्शब्दात् वहत्यर्थे ष्णेय ईन य एते स्युः। धुरं वहति धौरेयः धुरीणः धुर्य्यः।

सर्व्वदक्षिणोत्तराद्धुराया ईनः। ढात् सर्व्वादिपूर्व्वात् धुराशब्दात् वहत्यर्थे ईनः स्यात्। सर्व्वधुरां वहति सर्व्वधुरीणः दक्षिणधुरीणः उत्तरधुरीणः।

एकधुरायां लुक् च। एकधुरीणः एकधुरः (३)।

शकटाद्धलसीरात् ष्ण-ष्णिकौ गाच्च। ढात् शकटात् कृतगाच्च ष्णः हलसीरात् कृतगाच्च ष्णिकः स्यात् वहत्यर्थे। शकटं वहति शाकटः, द्वे शकटे वहति द्वैशकटः, हलं वहति हालिकः, सैरिकः, द्वे हले वहति द्वैहलिकः द्वैसीरिकः।

धनगणाभ्यां यो लब्धरि। ढाभ्यामाभ्यां लब्धर्य्यर्थे यः स्यात्। धनं लब्धा धन्यः, गण्यः शीलार्थष्टणो ढे न षौ।

---

(१) वत्सानां दमनार्थं यद्दारु स्कन्धे दीयते तत् प्रासङ्ग इति गोयीचन्द्रः (७६८सू)।

(२) वरस्य स्निग्ध इति षष्ठीसमासः। तथाच—जन्यो जामातुः स्निग्धः सखा चेति संक्षिप्तसारे (८०७सू)।

(३) गौणत्वात् गवाद्यादेरिति ह्रस्वः।

णेऽर्थात् (१)। अर्थं लब्धा आर्थस्छात्रः।

वशाङ्गते। ढात् वशाङ्गतेऽर्थे यः स्यात्। वश्य आयत्तता, तं गतो वश्यः।

सर्व्वादेः पत्र-पथङ्ग कर्म्म-पात्रादीनो व्याप्नोति। ढात् सर्व्व-पूर्व्वात् पत्रादेर्व्याप्नोत्यर्थे ईनः स्यात्। सर्व्वपत्रं व्याप्नोति सर्व्व-पत्रीणः सारथिः, सर्व्वपथीनो रथः, सर्व्वाङ्गीणं वासः, सर्व्वकर्म्मीणः पाणिः, सर्व्वपात्रीण ओदनः।

आप्रपदात् प्राप्नोति। ढादाप्रपदात् प्राप्नोतीत्यर्थे ईनः स्यात्। आप्रपदं प्राप्नोति आप्रपदीनं वासः (२)।

सर्व्वान्नाद् भक्षयति। सर्व्वान्नानि भक्षयति सर्व्वान्नीनो भिक्षुः।

अनुपदाद्वजा। अनुपदं वजा अनुपदीना उपानत्, पदप्रमा-णेत्यर्थः।

अयानयानेये। अयः प्रदक्षिणम्, अनयः प्रसव्यम्। प्रदक्षिण-प्रसव्यगामिनां शाराणां (३) यस्मिन् परैः (४) समावेशः (५)

---

(१) अर्थशब्दाल्लब्धरि वाच्ये णो भवतीत्यर्थः। संक्षिप्तसारेऽपि एवमेव। पाणिनीये तु "अन्नात् ण" इति सूत्रं दृश्यते (४।४।८५)

(२) यत् पादाग्रपर्य्यन्तं पतति तदाप्रपदीनम्। यौगिकत्वात् आप्रपदीनं माल्यादि च—इत्यमरटीका।

(३) शाराणाम् अक्षगुटिकानाम्।

(४) परैः परशारैः।

(५) समावेशः पदानामिति शेषः।

सोऽयानयः। ढादयानयश्चब्दान्नेयेऽर्थे ईनः स्यात्। अयानयं नेयः अयानयीनः शारः (१)।

परम्पर-पुत्रपौत्र-परोवरेभ्योऽनुभवति। ढेभ्य एभ्योऽनुभवतीत्यर्थे ईनः स्यात्। परञ्चापरञ्चानुभवति, सूत्रे निर्देशात् परम्परीणः। पुत्रञ्च पौत्रञ्चानुभवति पुत्रपौत्रीणः। तथाच—"लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नये"ति भट्टिः। परांश्चावरांश्चानुभवति, सूत्रे निर्देशादीत्वं, परोवरीणः। त्येन विनापि परम्परशब्दो दृश्यते न तु परोवर इति।

पारादेर्गामिनि। ढात् पारादेर्गामिन्यर्थे ईनः स्यात्। पारं गामी पारीणः। पारादिर्यथा—

पारावारावारपारपारावारं (२) प्रकीर्त्तितम्।
अत्यन्तमनुकामञ्च पारादौ कोविदोत्तमैः॥

अध्वनो यश्चालंगामिनि। अध्वानमलंगामी अध्वनीनः अध्वन्यः।

अभ्यमित्रादीयेनौ च। ढादभ्यमित्रादलंगामिन्यर्थे ईय ईन य एते स्युः। अभ्यमित्रम् अलंगामी अभ्यमित्रीयः अभ्यमित्रीणः अभ्यमित्रः। अमित्राभिमुखम् अलं गच्छतीत्यर्थः। भविष्यन्निर्देशो वैचित्र्यार्थः, गन्तृमात्रे त्यः।

---

(१) दक्षिणेन वामेन सहायनं गमनं प्रापयितव्यमित्यर्थे इति गोयीचन्द्र (६२१सू)।

(२) पार अवार अवारपार पारावार।

समांसमीनानुगवीनाद्यश्वीनाः । एते निपात्यन्ते । समां समां विजायते (१) समांसमीना गौः, प्रत्यब्दप्रसवेत्यर्थः (२) । अनुगु गोः पश्चादलंगामी अनुगवीनो गोपः । अद्य श्वो वा विजायते अद्यश्वीना गौः, आसन्नप्रसवेत्यर्थः । कथमद्यश्वीनो वियोगः ? विजायते इत्यस्याननुवृत्तेरिति जयादित्यः (३) । निपातो ह्यर्थविशेषे ।

उक्तो ढाधिकारः ।

धात् । धादित्यधिक्रियते धादित्यतः प्राक् ।

ष्णिको दीव्यत्यादौ । दीव्यति जयति खनति जितं कृतं भवति तरति चरति जीवति हरति निर्वृत्तं कार्यं लभ्यं सुकरं परिजय्यं संस्कृतं संसृष्टं उपसिक्तं वर्त्तते संपादौ क्रीतं गच्छति आहृतं युध्यते दृश्यते श्रूयते इति । धादेष्वर्थेषु ष्णिकः स्यात् । हलेन दीव्यति जयति खनति जितो वा हालिकः । जितेऽर्थे ढेऽपि त्यस्तेन अक्षैर्जितं द्रव्यम् आक्षिकम् । धादिति किं ? देवदत्तेन जितम् ।

---

(१) "समां समां विजायते" इत्येव पाणिनिसूत्रम् (५।२।१२) । समां समामिति वीप्सायां सुबन्तसमुदायः प्रकृतिः । विजायते गर्भं धारयतीति प्रत्ययार्थः । गर्भधारणेन सकलापि सभा व्याप्यत इति अत्यन्तसंयोगे द्वितीया * * * पूर्वपदे सुपोऽलुग्वक्तव्यः" इति काशिका ।

(२) समांसमीना सा यैव प्रतिवर्षं प्रसूयते इत्यमरः ।

(३) पाणिनीयव्याकरणे "समां समां विजायते" (५।२।१२) इति सूत्रादनन्तरम् "अद्यश्वीनावष्टब्धे" इति सूत्रम् (५ २।१३) । तत्रापि विजायते इत्यनुवर्त्तते । नन्तु तर्हि अद्यश्वीनो वियोग इति कथं भवतीत्याशङ्कायां "केचित्तु विजायते इति नानुवर्त्तयन्ति, अवष्टब्धमात्रे निपातनमित्याङरित्युक्तं जयादित्येन ।

वाक्-कायाभ्यां कृते। धाभ्यामाभ्यां कृतेऽर्थे ष्णिकः स्यात्। मूले वाचिकमिति। एवं कायेन कृतं कायिकम्। आभ्यामिति किं? मनसा कृतं मानसम्। तथाच हेमसूरिः—"कायिकं वाचिकं तत् स्याद्वाचा कायेन यत् कृतम्" इत्याह। इदमपाणिनीयमिति (१)।

तरति। धात् तरतीत्यर्थे ष्णिकः स्यात्। काण्डपूलेन तरति काण्डपूलिकः। एवं तृणपूलेन तरति तार्णपूलिकः, गौपुच्छिक।

इको नौ-द्व्यचः। धान्नौशब्दात् द्व्यचश्च इकः स्यात्। ष्णिकस्यापवादः। नाविकः। स्त्रियां नाविका। घटिकः। बाहुक। उक (२) इकस्य कः।

चरति। धाच्चरति इत्यर्थे ष्णिकः स्यात्। दध्ना चरति दाधिकः, दध्ना भक्षयतीत्यर्थः। हस्तिना चरति हास्तिकः, हस्तिना गच्छतीत्यर्थः। चरेरुभयार्थग्रहणम्।

---

(१) अस्यायमाशयः—मूले वाचा कृतमिति वाक्ये वाचिकमिति यदुदाहृतम् इदमपाणिनीयं पाणिनिसम्मतं न। तथाच "वाचो व्याहृतार्थायाम्" (५।४।३५) इति पाणिनिसूत्रम्। "व्याहृतः प्रकाशितोऽर्थो यस्यास्तस्यां वाचि वर्त्तमानाद्वाक्शब्दात् स्वार्थे ठक् (ष्णिक) प्रत्ययो भवति। पूर्वमन्येनोक्तार्थत्वात् सन्देशवाग्व्याहृतार्थेत्युच्यते। वाचिकं कथयति। व्याहृतार्थायामिति किं? मधुरा वाक् देवदत्तस्य" इति काशिका। सन्देशवाग् वाचिकं स्यादित्यमरः। वाचः सन्देशे इकञिति तट्टीकायां रघुनाथः। अतएव वाचा कृतमित्यर्थे वाचिकमित्यपाणिनीयमिति।

(२) उक् प्रत्याहारः।

पर्पादेः पिकः। धात् पर्पादेश्चरत्यर्थे पिकः स्यात्। पर्पेण चरति पर्पिकः। स्त्रियां पर्पिकी। पर्पशब्देन हस्त्यादिनयनार्था तृणपूर्णा नौरुच्यते। पर्पादिर्यथा—

पर्पाकष (१) रथ न्यास व्याल जालाश्वमेव च।
पादस्य पदु भवेन्नित्यमष्ट पर्पादयः स्मृताः॥

पादेन चरति पदिकः। आकषो निकषोपलः। इह आकष-शब्दपाठात् आकषिकभार्य्य इत्यत्र कोङ्लेऽपि न पुंवद्भाव-निषेधः। न्यास-व्यालशब्दयोरणित्ते न युम्। जालशब्दस्य इक-बाधनार्थः पाठः।

खगणाद्वा। धात् खगणाच्चरत्यर्थे णिको वा स्यात्। खगणेन चरति खगणिकः खागणिकः।

वेतनादेर्जीवति। धाद्वेतनादेर्जीवत्यर्थे णिकः स्यात्। वेत-नेन जीवति वैतनिकः। वैतनादिर्यथा—

वेतन-वाह जालार्द्धवाह-प्रेषण-शक्तयः।
दण्डो-धनुरुपस्थानं सुखशय्या तथैव च॥
शिर-पादौ धनुर्दण्डोपनिषदेशमेव च।
उपस्तिरुपदेशश्च सप्तभिर्दश कीर्त्तिताः॥

वस्त्र क्रय विक्रय क्रयविक्रयादिकः। भ्यो एभ्यो जीवत्यर्थे इकः स्यात्। वस्त्रेन जीवति वस्त्रिकः, क्रयिकः, विक्रयिकः, क्रयविक्रयिकः।

---

(१) पाणिनीये तु आकष इत्यत्र अर्हत्य इति पाठो दृश्यते (४।४।१०) आकर्ष इति पाठान्तरम्। "आकर्षात् वर्" इति पाणिनीयसूत्रम् (४।४।८)।

आयुधादीयश्च। आयुधेन जीवति आयुधीयः आयुधिकः।

व्रातादीनः। ये नानाजातीया अनियत-वृत्तयः शरीर-मायास्य जीवन्ति ते व्राताः, तत्कर्म्मापि व्रातं, तेन जीवति व्रातीनो विप्रः।

उत्सङ्गादेर्हरति। धादुत्सङ्गादेर्हरत्यर्थे ष्णिकः स्यात्। उत्-सङ्गेन हरति औत्सङ्गिकः। उत्सङ्गादिर्यथा—

उत्सङ्गपिटकोष्ट्राश्च उडुपोत्पतमेव च।

भस्त्रादेः षिकः। धाङ्भस्त्रादेः षिकः स्यात् हरतीत्यर्थे। ष्णिकस्यापवादः। भस्त्रया हरति भस्त्रिकः, स्त्रियां भस्त्रिकी। भस्त्रादिर्यथा—

भस्त्रांऽसभार-भरटांऽसेभार-भरणं तथा।
भस्त्रादौ शीर्षभारश्च शीर्षेभारः प्रकीर्त्तितः॥

विवध-वीवधाभ्यां वा। विवधेन हरति विवधिकः वैवधिकः। स्त्रियां विवधिकी वैवधिकी। एवं वीवधिकीत्यादि।

कुटिलिकायाः ष्णः। धात् कुटिलिकाशब्दात् हरत्यर्थे ष्णः स्यात्। कुटिलिकाशब्देन कुटिला गतिः अग्रवक्रा लौहादिमयी यष्टिश्च उच्यते। कुटिलिकया कुटिलगत्या व्याधं हरति वञ्चयति कौटिलिको मृगः। तथा कुटिलिकया अग्रवक्रलौहयष्ट्या अङ्गारान् हरति कौटिलिकः कर्म्मकारः।

अक्षद्यूतादेर्निवृत्ते। धादक्षद्यूतादेर्निवृत्तेऽर्थे ष्णिकः स्यात्। अक्षद्यूतेन निवृत्तम् आक्षद्यूतिकं वैरम्। अक्षद्यूतादि-र्यथा—

अक्षद्यूत जाया पादस्खेद कण्टकमर्दनम् ।
यातोपयात प्रकृत गतागत गमागमम् ॥

याचितापमित्याभ्यां क-कणौ । धाभ्यामाभ्यां क्रमात् क-कणौ स्यातां निर्वृत्ते । याचितेन निर्वृत्तं याचितकम् । अपपूर्व्वमेङ प्रतिदाने यपि अपमित्य निर्वृत्तम् आपमित्यकम् । सूत्रे पीनिर्देशोऽनुकरणात् ।

कालेभ्यः कार्य्य लभ्य सुकर परिजय्येषु च । ञ्यनिर्देशः स्वरूपविधेर्निरासार्थः । धेभ्यः कालवाचिभ्यो निर्वृत्ते कार्य्यादिषु च ष्णिकः स्यात् । मासेन निर्वृत्तः मासिकः आर्द्धमासिकः सांवत्सरिकः । एवं मासेन कार्य्यः लभ्यः सुकरः परिजय्यो वा मासिक इत्यादि ।

समादेरधीष्टादिवत् । धात् समादेर्निर्वृत्तेऽर्थे अधीष्टादिवत् यथाविहितं त्याः स्युः । समया निर्वृत्तः समीनः द्विसमीनः द्वैसमिकः, द्विरात्रीणः द्वैरात्रिकः, द्वयह्नीनः द्वैयह्निकः, द्विसंवत्सरीणः द्विसांवत्सरिकः, द्विवर्षीणः द्विवार्षिकः । द्विवर्षः, चित्तवति नित्यं लुक् । द्विवर्षौ वत्स इत्येतत् पुरुषोत्तमेनोक्तम् ।

षष्टिकः । निपात्यः । षष्टिरात्रेण पच्यते षष्टिको व्रीहिः ।

संसृष्टे । धात् संसृष्टेऽर्थे ष्णिकः स्यात् । द्रव्यान्तरेण यन्मिश्रीकृतं तत् संसृष्टं । दध्ना संसृष्टं दाधिकं, शार्ङ्गवेरिकम् (१) ।

मुद्ग-चूर्णाभ्यां ष्णेनौ । धाभ्यामाभ्यां क्रमात् संसृष्टेऽर्थे ष्ण इन्

---

(१) शृङ्गवेरम् आर्द्रकम् ।

एतौ स्याताम्। मुद्गेन संसृष्टः मौद्ग ओदनः, चूर्णेन संसृष्टाः चूर्णिनोऽपूपाः।

लवणाल्लुक्। लवणेन संसृष्टः लवणः सूपः। लवणशब्दोऽत्र द्रव्यवाची (१)।

व्यञ्जनेभ्य उपसिक्ते। धेभ्यो व्यञ्जन-वाचिभ्य उपसिक्तेऽर्थे ष्णिकः स्यात्। दध्ना उपसिक्तं दाधिकं, शार्ङ्गवेरिकम्। व्यञ्जनेभ्य इति किम्? उदकेनोपसिक्त ओदनः।

ओजःसहोऽम्भसो वर्त्तते। धेभ्य एभ्यो वर्त्ततेऽर्थे ष्णिकः स्यात्। ओजसा वर्त्तते औजसिकः, साहसिकः, आम्भसिकः।

सम्मादिनि। धात् सम्मादिन्यर्थे ष्णिकः स्यात्। सम्मादो शोभायुक्तः (२)। कर्णवेष्टकाभ्यां सम्मादि कार्णवेष्टकिकं मुखं, वास्त्रयुगिकं शरीरं, वस्त्रयुगेन विशेषतो भ्राजत इत्यर्थः।

कर्म्मवेषाभ्यां यः। धाभ्यामाभ्यां सम्मादिन्यर्थे यः स्यात्। कर्म्मणा सम्मादी कर्म्मण्यः, वेष्यः। वेषोऽत्र नेपथ्यवाची।

मूल्यात् क्रीते। धान्मूल्यवाचिनः क्रीतेऽर्थे ष्णिकः स्यात्। प्रस्थेन मूल्येन क्रीतं प्रास्थिकं, नैष्किकम्। मूल्यादिति किं? हस्तेन क्रीतम्। हान्तात् ब्वान्ताच्च त्यो न भवति अनभिधानात्, तेन प्रस्थाभ्यां प्रस्थैर्वा क्रीतमित्यर्थे न स्यात्। यत्र तु प्रकृत्यर्थस्य

---

(१) द्रव्यवाचो लवणशब्दो लुकं प्रयोजयति न गुणवाचीति भाष्यिकाः (४.४।२४।

(२) गुणोत्कर्षः सम्पत्तिः, शोभेति यावत्। तथाच सम्पद्यते यस्यां शोभते यत् तत् सम्मादि।

संख्याभेदावगमे प्रमाणमस्ति तत्र भवत्येव। यथा द्वाभ्यां क्रीतं द्विकं पञ्चकमित्यादि। कथं मुद्गैर्माषैर्वा क्रीतं मौद्गिकं माषिकं वसनमिति चेत् सत्यं, तत्र भवत्यभिधानात्। न ह्येकेन मुद्गेन माषेण वा क्रयणं सम्भवति।

शतादेरर्हत्यादिवत्। धात् शतादेरर्हत्यादिवत् यथाविहितं त्याः स्युः क्रीतेऽर्थे। शतेन क्रीतं शत्यं शतिकं, द्विकं पञ्चकं विंशतिकं यावतिकं यावत्कं, कंसिकं, कार्षापणिकं प्रतिकं, वासनं, शौर्पं शौर्पिकं, द्विकंसम् अध्यर्द्धकंसं, द्विसुवर्णं द्विसौवर्णं, द्विविंशतिकोनः द्विपाद्यं, द्विशत्यं द्विशतं, खारीकं, द्वैशाणं द्विशाण्यं द्विशानं, द्विनैष्किकं द्विनिष्कमित्यादि।

उत्तरादेः पथो गच्छत्याहृतयोः। धादुत्तरादिपूर्व्वात् पथिशब्दात् गच्छति आहृते चाऽर्थे ष्णिकः स्यात्। उत्तरपथेन गच्छति आहृतो वा औत्तरपथिकः, आहृतेऽर्थे ढे त्यः। वारिपथिकः। उत्तरादिर्यथा—

उत्तरो वारि कान्तार जङ्गल स्थल शङ्कवः।
अज: सप्तेहोत्तरादौ कोविदैः परिकीर्त्तिताः॥

युध्यते। धाद्युध्यतेऽर्थे ष्णिकः स्यात्। खड्गेन युध्यते खाड्गिकः, धनुषा युध्यते धानुष्कः, उसन्तत्वात् इकस्य कः।

शक्तियष्टिभ्यां ष्णीकः। धाभ्यामाभ्यां युध्यतेऽर्थे ष्णीकः स्यात्। मूले शक्त्या युध्यत इत्यादि। परे तु धान्नोदाहृतं किन्तु प्रग्रन्तादित्याहुः (१)।

---

(१) तथाच शक्तिः प्रहरणमस्येति शाक्तीक इति काशिका (४।४.५९)।

उक्तो दीव्यत्यादिः।

रागाद्रक्ते। धाद्रागवाचिनो रक्तेऽर्थे ष्णः स्यात्। यद्यपि रन्जधोरनेकार्थत्वं, यथा भोजने रक्तः, रक्तो गौः, तथाप्यत्र शुक्लस्य वर्णान्तरापादनं रञ्जेरर्थः। कषायेण रक्तं काषायं, माञ्जिष्ठं, कौसुम्भम्। कथं काषायौ गर्दभस्य कर्णौ, हारिद्रौ कुक्कुटस्य पादौ? इति तु उपमानाङ्गविष्यति। कषायेण रक्ताविव काषायौ, हरिद्रया रक्ताविव हारिद्रौ इत्यर्थः। रागादिति किं? पाणिना रक्तम्।

हरिद्रा-मञ्जिष्ठाभ्यां ट्णो नील्यास्त्वनित्। धाभ्यामाभ्यां रक्तेऽर्थे ट्णः स्यात्, नीलीशब्दात् ट्णोऽनित्। हरिद्रया रक्तं हारिद्रं, माञ्जिष्ठं, नील्या रक्तं नीलम्। चान्द्रास्तु नीलीशब्दात् अमाहुः।

पीतात् को, लाक्षारोचनात्तु ष्णिको, वा तु शकल-कर्दमात्। धात् पीतात् कः स्यात्, लाक्षारोचनाभ्यान्तु ष्णिकः, शकल-कर्दमाभ्यां ष्णिको वा। पीतेन रक्तं पीतकम्। लाक्षया रक्तं लाक्षिकं, रौचनिकम्। शाकलिकं, कार्दमिकं; पक्षे ष्णः—शाकलं, कार्दमम्।

नक्षत्रेभ्यो युक्ते काले। धेभ्यो नक्षत्रवाचिभ्यो युक्तेऽर्थे वेत्यादित्वात् ष्णः स्यात्, यो युक्तः स कालश्चेन्नवति। मूले तिष्येणेत्यादि, ष्णे कृते सूर्य्यागस्त्यस्येत्यादिना यलोपः। एवं पौषी। ननु कालेन सह सर्व्वदैव नक्षत्राणां योगः कालस्य नित्यत्वात्, तत् कथं तिष्यादिना कालविशेषोऽभिधीयते इति चेत्

सत्यं, गङ्गायां घोषः प्रतिवसति इत्यादौ यथा गङ्गाशब्देन तत्समीपस्थतीरमुपलक्ष्यते तथात्रापि तिष्यादिभिर्नक्षत्रैः समीपस्थचन्द्रो यदा लक्ष्यते तदा तेभ्यस्य उत्पद्यते। तथाच तिष्यसमीपस्थेन चन्द्रमसा युक्त इत्यर्थः। नक्षत्रेभ्य इति किं? चन्द्रमसा युक्ता रात्रिः। काल इति किं? पुष्येण युक्तश्चन्द्रमाः।

अविशेषे लुबश्वत्थश्रवणाभ्यान्तु नाम्नि। धेभ्यो नक्षत्रवाचिभ्यो विहितणस्य लुप् स्यात्, अश्वत्थश्रवणाभ्यान्तु संज्ञायां, रात्र्यादिविशेषो यदि नाभिधीयते। अद्य पुष्यः अद्य मघा। अत्र यावान् नक्षत्रेण कालो लक्ष्यते स कालोऽहोरात्रस्तस्य विशेषाभावात्। अविशेष इति किं? पौषी रात्रिः, पौषमहः। अश्वत्थेन युक्तो मुहूर्त्तः अश्वत्थो मुहूर्त्तः, श्रवणा रात्रिः। विशेषार्थोऽयमारम्भः। संज्ञायामिति किम्? आश्वत्थी रात्रिः, श्रावणमहः। सर्व्वत्र लुपि युक्तवद्भावः।

भचादीयः। क्रतचानक्षत्रवाचकात् युक्ते कालेऽर्थे ईयः स्यात्। तिष्यपुनर्वसवीयमहः, अद्य तिष्यपुनर्वसवीयं, राधानुराधीया रात्रिः, अद्य राधानुराधीयम्। परत्वाल्लुपं बाधित्वा विशेषाविशेषयोः प्रवर्त्तते। भ इति किं? विधुश्च पुष्यश्च ताभ्यां युक्तः कालः।

परिवृते रथे। धात् परिवृतेऽर्थे वेत्यादित्वात् ष्णः स्यात् यः परिवृतः स रथश्चेद्भवति। वल्लेण परिवृतो रथः वाल्लो रथः, चार्म्मणो रथः, विकारभिन्ने ष्णे न नलोपः। काम्बलो रथः, समन्ताद्वेष्टित इत्यर्थः। यस्य सर्व्वावयवो न वेष्टितस्तत्र न

भवति, यथा छात्रैः परिवृतो रथः। रथ इति किं ? वस्त्रेण परिवृतः कायः।

द्वैपवैयाघ्रात् ट्णः, इंस्तु पाण्डुकम्बलात्। धाभ्यामाभ्यां ट्णः स्यात् परिवृतरथेऽर्थे। पाण्डुकम्बलात्तु इन्। द्वैपेन परिवृतो रथो द्वैपो रथः; वैयाघ्रो रथः, पाण्डुकम्बली रथः।

हस्त-यथाकथाचाभ्यां यणौ दीयते कार्ये च। धाभ्यामाभ्यां क्रमात् यणौ स्यातां दीयतेऽर्थे कार्येऽर्थे च। हस्तेन दीयते कार्यं वा हस्त्यं, यथाकथाच शब्दो व्य-समुदायोऽनादरार्थः। यथाकथाच दीयते कार्यं वा याथाकथाचम्।

छन्दसो यो निर्म्मिते उरसः षण्च। धात् छन्दसो निर्म्मितेऽर्थे यः स्यात्, उरसो यः षण्च। छन्दसा इच्छया निर्म्मितं छन्दस्यं विश्वम्, उरसा निर्म्मितम् उरस्यम् औरसम्।

पूरणान्तात् को ग्रन्थं गृह्णाति, तस्य लुक् च। पूरणत्यान्तात् ग्रन्थं गृह्णाति इत्यर्थे कः स्यात् तस्य पूरणस्य लुक् च। ग्रन्थग्रहणयोग्यो रूपादिरेव (१) पूरणत्यान्ताभिधेयः। द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विको वटुः, तृतीयेन रूपेण ग्रन्थं गृह्णाति त्रिकः, लुकि पूर्व्वप्रकृतिः। ग्रन्थभिन्नग्रहणे तु पञ्चमेन दिनेन शब्दं गृह्णाति, द्वितीयेन हस्तेन दण्डं गृह्णाति। एवं चक्षुषा दृश्यते चाक्षुषः, श्रवणेन श्रूयते श्रावणः, मनसा ज्ञायते मानसः, दृशिर्ज्ञानार्थः। इति धाधिकारः।

---

(१) रूपं ग्रन्थानामादृत्तिः।

घात्। घादित्यधिकारो जादित्यतः प्राक्।

दृष्टे साम्नि। घात् दृष्टेऽर्थे वेत्यादित्वात् षणः स्यात्, यत् दृष्टं तत् साम चेद्भवति। वशिष्ठेन दृष्टं साम वाशिष्ठं, वैश्वामित्रम्।

षणो डिद्वा। अत्रार्थे विहितः षणो डिद्वा स्यात्। विंशत्या दृष्टं साम विंशं, डिति टेर्लोपः। पक्षे वैंशतं साम। एवम् औशनम् औशनसं साम। यमादिभ्यस्त्वपत्यवत् इति। यमेन दृष्टं साम याम्यम् आदित्यम् आग्नेयं कालेयं दैव्यं देवं प्राजापत्यं पाशुपतं औत्समित्यादि।

वामदेवात् यः। घाद्वामदेवशब्दाद्यः स्यात् दृष्टे साम्नि। वामदेवेन दृष्टं साम वामदेव्यं साम।

तीयात् षणीकः। तीयान्तादत्रार्थे षणीकः स्यात्। द्वितीयेन दृष्टं साम द्वैतीयीकं तार्त्तीयीकं साम।

गोत्रादङ्गवत्। अपत्यान्तेभ्यो येभ्योऽङ्गेऽर्थे ये त्या विधेया अत्राऽर्थे ते त्याः स्युः दृष्टे सामन्यर्थे। औपगवेन दृष्टं साम औपगवकं साम। ग्लुचुकायनिना दृष्टं साम ग्लौचुकायनकं साम, वैदेन दृष्टं साम वैदं साम, गार्गं साम, दाक्षं साम।

नाम्नि मच्चिकादेः कृते। घान्मच्चिकादेः कृतेऽर्थे षणः स्यात् समुदायेन संज्ञा चेद्भवति। मच्चिकाभिः कृतं माच्चिकं मधु मच्चिकादिर्यथा—

मच्चिका पुत्तिका गर्म्मुत् सरघाः परिकीर्त्तिताः।

पौत्तिकं गार्म्मुतं सारघं, मधुनः संज्ञा।

क्षुद्रा भ्रमर वरटा वातपात् (१) ट्णः। घेभ्यः एभ्यः कृतेऽर्थे ट्णः स्यात्। क्षुद्राभिः कृतं क्षौद्रं भ्रामरं वारटं वातपं मधु।

कुलालादेर्णकः। घात् कुलालादेः कृतेऽर्थे णकः स्यात् नाम्नि। कुलालेन कृतं कौलालकम्।

कुलालो गिरिकः सेना चण्डालः परिपद्वधूः।
कर्म्मारो वरुडोऽनड्वान् कुम्भकार उरस्तथा॥
ब्राह्मणो देवराजस्य श्वपाकः परिकीर्त्तितः।
निषादश्च कुलालादौ परे शिष्टप्रयोगतः॥

कृते ग्रन्थे। घात् कृतेऽर्थे वेत्यादित्वात् ष्णः स्यात्, यः कृतः स चेद्ग्रन्थो भवति। वररुचिना कृतो ग्रन्थः वाररुचः प्राभाकरः। यमादेस्तु याम्यः आग्नेयः प्राजापत्यः कान्तेयः दैव्यः दैवः औत्सः। भवादित्वात् पाणिनिना कृतो ग्रन्थः पाणिनीयः। शास्त्रविशेषणत्वात् मूले पाणिनीयमिति क्लीवम्। एवं काशकृत्स्नं काश्यमित्यादि।

प्रोक्ते। घात् प्रोक्तार्थे वेत्यादित्वात् ष्णः स्यात्। प्रकर्षेणोक्तं प्रोक्तं व्याख्यातं अधीतं वा, न तु कृतं, कृते ग्रन्थे इत्यनेनावगतत्वात्। यज्ञवल्क्येन प्रोक्तं याज्ञवल्क्यं, प्राभाकरं, गौतमम्। मूले शार्व्ववर्ष्मिकं शर्व्ववर्ष्मणा प्रोक्तमिति वाक्यं, काश्यादित्वात्-ष्णिक-ष्णिकौ। स्त्रियां शार्व्ववर्ष्मिका शार्व्ववर्ष्मिकीति। एवं व्यासेन प्रोक्ता संहिता वैयासिका वैयासिकी। एवं पाणिनीयं, पणोऽस्यास्ति पणी, तस्यापत्यं णे पाणिनः, पण्यादित्वात् न नलोपः,

(१) वरटा इत्यत्र वटर, वातप इत्यत्र पादप इति पाणिनिः।

स भवान् पाणिनिः, युवत्यः पूज्ये, तेन प्रोक्तम्। न्यासकारस्तु पणोऽस्यास्ति फलादित्वादिनः, तस्यापत्यम् अतः ष्णिः, तेन प्रोक्तं गहादिपाठादीय इत्याह। गोत्रार्थे ष्णेस्तु आपिशलिना प्रोक्तम् आपिशलम्, एवं काश्येन प्रोक्तं काश्यम्। यमादेस्तु याम्यं प्राजापत्यम् आग्नेयं कालेयं पाशुपतम् औत्सर्गमित्यादि।

उख-तित्तिरि-वरतन्तु-खण्डिकाभ्यश्छन्दसि। एभ्य एभ्यश्छन्दसि विषये प्रोक्तार्थे णीयः स्यात्। कल्पसूत्रछन्दोब्राह्मणानि तद्विषयाणि इति तद्विषयता। उखेन प्रोक्तं छन्दोऽधीते औखीयः तैत्तिरीयः वारतन्तवीयः खाण्डिकीयः। छन्दसीति किम्? उखेन प्रोक्ताः श्लोकाः औखाः।

छगलिनो णेयिन्। घाच्छगलिनः प्रोक्तेऽर्थे छन्दोविषये णेयिन् स्यात्। कलाप्यन्तेवासित्वाञ्ञिनोऽपवादः। छगलिना प्रोक्तं छन्दोऽधीते छागलेयी। प्रोक्ताल्लुगित्यनेन अध्येतृवेदितृष्णस्य लुक्। एवमन्यत्र।

शौनकादेर्णिन्। घाच्छौनकादेश्छन्दसि विषये प्रोक्तार्थे णिन् स्यात्। शौनकेन प्रोक्तं छन्दोऽधीते शौनकी स्कान्दी। शौनकादिर्यथा—

शौनकः स्कन्दः शापेयः शाम्भेयः पुरुषायुषः।
शापायनो रज्जुकण्ठो देवदर्शेन शाङ्करः॥
स्कम्भ-वाजसनेयौ तलवकारेण संयुतौ।
खाड़ायनो रज्जुभारः कषाय इह कीर्त्तितः।
कठशाठौ शौनकादौ षड्भिर्दश मनीषिभिः॥

कठशाठाविति समुदितस्यात्र ग्रहणम्। कठशाठाभ्यां प्रोक्तं छन्दोऽधीते काठशाठी। केवलात्तु लुक् वक्ष्यति। येऽत्र वृद्धास्तेभ्य ईयः अन्येभ्यः ष्णो बाध्यते।

कलापिशिष्याऽकलापिवैशम्पायनशिष्येभ्यः। येभ्यः कलापिशिष्येभ्यः कलापिवर्ज्जेभ्यो वैशम्पायनशिष्येभ्यश्च छन्दोविषये प्रोक्तेऽर्थे णिन् स्यात्।

तत्र,—

कलापिशिष्याश्चत्वारो हरिद्रुश्छगली तथा।
उपलस्तुम्बुरुश्चाथ वैशम्पायनशिष्यकाः।
पलिङ्ग(१) कमलाऽऽलम्बि-कठ-ताण्ड्य-कलापिनः॥

श्यामायनोऽपि ऋषभोऽरुणिरिति नव स्मृताः (२)।

हरिद्रुणा प्रोक्तं छन्दोऽधीते हारिद्रवी एवं पालिङ्गी। ननु कलापी वैशम्पायनशिष्यः, तच्छिष्या हरिद्रादयश्चत्वारो वैशम्पायनप्रशिष्या भवन्तीति वैशम्पायनशिष्यद्वारेणैव सिध्यति, किं पृथग्ग्रहणेनेति चेत् सत्यम्, अत्र कलापिशिष्यग्रहणं साक्षाच्छिष्यज्ञापनार्थम्, अन्यथा कठशिष्यस्य खाड़ायनस्य वैशम्पायनशिष्यत्वात् शौनकादौ पाठोऽनुचितः। न च खाड़ायनशब्दस्तत्र न पठनीय इति वाच्यम्, अस्य प्रशिष्येभ्यो णिन्प्रसङ्गात्। अकलापिन इति किं कलापिना प्रोक्तं छन्दोऽधीते कालापः, कलाप्यादित्वान्नलोपनिषेधाभावात् नलोपे इकारलोपः।

---

(१) पतङ्ग इत्यन्यत्र पाठः।

(२) ऋषभ इत्यत्र ऋचाभ अरुणिरित्यत्र आरुणिरित्यन्यत्र पाठः।

कठचरकालुक् । घाभ्यामाभ्यां छन्दसि विषये प्रोक्तार्थ-त्यस्य लुक् स्यात् । कठेन प्रोक्तं छन्दोऽधीते कठः, चरकः । छन्दसीति किं काठः श्लोकः ।

ऋषेः काश्यप-कौशिकाभ्यिन् कल्पे च । घाभ्यामाभ्यां कल्पे छन्दसि च वाच्ये प्रोक्तेऽर्थे णिन् स्यात् । ईयस्यापवादः । काश्य-पेन प्रोक्तं कल्पं छन्दो वाऽधीते काश्यपी एवं कौशिकी । ऋषेरिति किम् ? इदानीन्तनकाश्यपगोत्रः काश्यपः, तेन प्रोक्तं कल्पं छन्दो वाधीते काश्यपीयः कौशिकीयः, इदादीयः । यज्ञकर्मणा-नुष्ठेयविधेर्विधायको ग्रन्थः कल्पः । काश्यपेन ऋषिणा प्रोक्तः श्लोकः काश्यपीयः श्लोकः । अपरे इह छन्दो नानुवर्त्तयन्ति ।

पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः (१) । घाभ्यामाभ्यां क्रमात् भिक्षुनटसूत्रयोर्वाच्ययोः प्रोक्तार्थे णिन् स्यात् । पारा-शर्य्येण प्रोक्तं भिक्षुसूत्रमधीते पाराशरी भिक्षुः, ईयो वाध्यते । शिलालिना प्रोक्तं नटसूत्रमधीते शैलाली नटः ।

कर्म्मन्द-कृशाश्वाभ्यामिन् । घाभ्यामभ्यां क्रमात् भिक्षुनट-सूत्रयोर्वाच्ययोः प्रोक्तेऽर्थे इन् स्यात् । कर्म्मन्देन प्रोक्तं भिक्षुसूत्र-मधीते कर्म्मन्दी भिक्षुः, कृशाश्वेन प्रोक्तं नटसूत्रमधीते कृशाश्वी नटः । भिक्षुनटसूत्रयोरिति किं ? कार्म्मन्दः कार्शाश्वः श्लोकः ।

ऋषिप्रोक्तयोर्ब्राह्मणकल्पयोर्णिन्न याज्ञवल्क्यादेः । याज्ञवल्क्या-दिभिन्नात् घात् ऋषिप्रोक्तयोर्ब्राह्मणकल्पयोर्णिन् स्यात् । उप-

---

(१) सूत्रशब्दः प्रत्येकमभिसम्बध्यते । भिक्षुसूत्रनटसूत्रयोरित्यर्थः ।

निषङ्गोगतिरिक्तवेदव्याख्यानं ब्राह्मणं। शाट्यायनेन प्रोक्तं ब्राह्मण-मधीते शाट्यायनी, पिङ्गेन प्रोक्तः कल्पः पैङ्गी कल्पः। याज्ञ-वल्क्यादेस्तु याज्ञवल्कः आश्मरथः शौलभनः। याज्ञवल्क्यादिभ्यो वेत्यादिविहितष्णस्य प्रोक्ताधिकारविहितत्वाभावादध्येष्टवेदिष्ट-विषयता मा भूत्। पैङ्गीत्यत्र णिनः प्रोक्ताधिकारविहितत्वेऽपि न स्यात् (१), कल्पग्रहणेन तत्र ऋषेः काश्यपकौशिकाश्मीनः कल्पे इति कल्पस्यैव ग्रहणात् (२)।

इति घाधिकारः।

अत्र च त्रय साधुः क्षत्रियः यज्ञिय इति मूले लिपिकरप्रमादः, भात् त्याभावात्।

जात्। जादित्यधिकारो डात् प्राक्।

आगते। जादागतेऽर्थे वेत्यादित्वात् ष्णः स्यात्। मूले मथुराया इत्यादि, ष्णे आकारलोपः त्रिश्च। एवं स्रौघ्न इत्यादि। यमादागतः याम्यः प्राजापत्यः पाशुपतः आग्नेयः औत्सः। भवा-दित्वात् गार्गीयः काशिकः राष्ट्रियः नादेय इत्यादि। इह यन्मुख्यं तस्यैव ग्रहणं, तेनेह न स्यात् स्रुघ्नादागतः सन् वृक्ष-मूलादागत इति (३)।

---

(१) अध्येष्टवेदिष्टविषयता इति शेषः।

(२) तथाहि यद्यत्रापि अध्येष्टवेदिष्टविषयता तर्हि तत्सूत्रे कल्पग्रहण-मनर्थकं स्यात्। तस्मात् तत्रैव कल्पे वाच्ये अध्येष्टवेदिष्टविषयता, अत्र नेति सिध्यतीति दृष्टन्मुग्धबोधम्।

(३) "आद्यपादानादागते" इति संक्षिप्तसारसूत्रम् (५०१) तत्र गोयी-चन्द्रः—आदिशब्दः प्रथमपर्यायः। प्रथमपादानं विशेषो यस्मात् तस्मादा-

आयस्थानेभ्यः ष्णिकोऽशुण्डिकादेः । जेभ्य आयस्थानवाचिभ्यः आगतेऽर्थे ष्णिकः स्यात्, न तु शुण्डिकादेः । आयः स्वामिग्राह्यो भागः, स यस्मिन्नुत्पद्यते तदायस्थानम् । शुल्कशालाया आगतः शौल्कशालिकः आकरिकः । ञ्वनिर्देशः स्वरूपविधेर्निरासार्थः । शुण्डिकादेस्तु—शुण्डिकादागतः शौण्डिकः । शुण्डिकादिर्यथा—

शुण्डिकः क्रकणस्तीर्थ-भूमि-पर्ण-तृणोपलम् ।
उदपानं स्थण्डिलञ्च शुण्डिकादौ नवेरिताः ॥

क्रकणपर्णयोः पाठः, पर्णक्रकणाद् भारद्वाजे इति ईयस्य बाधनार्थः । तीर्थस्य धूमादिपठितस्य णकबाधनार्थः । उदपानस्य उल्लादिपठितस्य ट्णबाधनार्थः । अन्येषामायस्थानवाचित्वात् ष्णिकनिषेधार्थः पाठः ।

विद्यायोनिसम्बन्धाट्टतः । विद्याकृतो योनिकृतश्च सम्बन्धो यस्य तस्माट्टतो जात् आगतेऽर्थे ष्णिकः स्यात् । होतुरागतः हौटकः मातृकः स्वास्रकः, उकप्रत्याहारादिकस्य कः । विद्यायोनिसम्बन्धादिति किं ? सवितुरागतं सावित्रं कार्त्तम् ।

पितुर्यश्च । अस्मिन्नर्थे पितृशब्दात् य-ष्णिकौ स्याताम् । पितुरागतं पित्र्यं पैतृकं, पूर्ववदिकस्य कः ।

अनृतो णकः । जाद्विद्यायोनिसम्बन्धादनृदन्तान्णकः स्यात् आगतेऽर्थे । उपाध्यायादागतम् औपाध्यायकम्, पैतामहकः मातामहकः मातुलकः ।

गतेऽर्थे टण् प्रत्ययो भवति । आदिग्रहणं किमर्थम् ? यदा मगधादागच्छन् वृक्षमूलादागतः, तदा वृक्षमूलशब्दात् टण् न भवतीति ।

नृहेतुभ्यो मयट्रूप्यौ वा। जेभ्यो नृवाचिभ्यो हेतुवाचिभ्यश्च आगतेऽर्थे मयट् रूप्यश्च स्यात्। देवदत्तादागतं देवदत्तमय देवदत्तरूप्यं। पक्षे दैवदत्तं, वृद्धपक्षे दैवदत्तीयम्। एवं यज्ञदत्तमयं यज्ञदत्तरूप्यं यज्ञदत्तीयमित्यादि। हेतुभ्यस्तावत्-समादागतं सममयं समरूप्यं। पक्षे समीयं, गहादित्वात् ईयः। एवं विषममयं विषमरूप्यं विषमीयं। ध्वनिर्देशः स्वरूपविधेर्निरासार्थः।

अपत्यादङ्गवत्। अपत्यान्तेभ्योऽङ्गेऽर्थे येभ्यो ये त्या विहितास्तेभ्य आगतेऽर्थे ते त्याः स्युः। औपगवादागतम् औपगवकम्, वैदः गार्गः दाक्ष इत्यादि।

प्रभवति। जात् प्रभवत्यर्थे वेत्यादित्वात् ष्णः स्यात्। हिमवतो गङ्गा प्रभवति हैमवती गङ्गा। दारदी सिन्धुः। यमादेस्तु याम्यः प्राजापत्यः पाशुपतः आग्नेयः औत्स इत्यादि। भवादित्वाद् गाङ्गेयः काशिकः राष्ट्रियः नादेय इत्यादि।

बालवायाण्णो विदूरश्च। जात् बालवायात् प्रभवत्यर्थे ण्यः स्यात्, ण्ये विदूरादेशश्च। बालवायात् (१) प्रवभति वैदूर्य्यो मणिः। परैकदेशिनस्तु विदूरशब्दात् ण्यन्तं विधाय वैदूर्य्यं साधयन्ति (२)।

धर्म्मादेर्य्योऽनपेते। जाद्धर्म्मादेरनपेतेऽर्थे यः स्यात्। धर्म्मादनपेतं धर्म्म्यम्। धर्म्मादिर्यथा—

---

(१) बालवायो देशविशेषः।

(२) "विदूराञ्ञ्यः" इति पाणिनिसूत्रम् (४।२।८४)।

धर्म्मार्थन्यायपन्थानश्चत्वारोऽत्र प्रकीर्त्तिताः । इति जाधिकारः ।

डात् । डादित्यधिकारः ष्याः प्राक् ।

पात्रादुद्धृते । डात् पात्रवाचिन उद्धृतेऽर्थे वेत्यादित्वात् ष्णः स्यात् । पात्रं भाजनम्, उद्धृतं भुक्तोच्छिष्टम् । शरावेषूद्धृत ओदनः शारावः, कार्परः । पात्रादिति किं ? पाणावुद्धृतः ।

स्थण्डिलाद्व्रतशयितरि । व्रतेन यः शेते स व्रतशयिता, तस्मिन् डात् स्थण्डिलात् वेत्यादित्वात् ष्णः स्यात् । स्थण्डिले व्रतेन शेते स्थाण्डिलो ब्रह्मचारी । व्रतमिति शास्त्रकृतो नियमः ।

संस्कृते भक्ष्ये । डात् संस्कृतेऽर्थे वेत्यादित्वात् ष्णः स्यात्, यत् संस्कृतं तत् भक्ष्यं चेत् भवति । भ्राष्ट्रे (१) संस्कृताः भ्राष्ट्राः मुद्गाः, पैठराः (२) पूपाः । खर-विषद-भक्ष्यवहार्य्यं भक्ष्यमिति जयादित्यादिभिरत्र रूढिरुक्ता । खरभक्ष्यवहार्य्यं भृष्टमुद्गादि, विषदभक्ष्यवहार्य्यम् ओदनादि । भक्ष्य इति किं पुष्पपटलेन संस्कृतो मालागुणः ।

दध्नः ष्णिको वा तूदश्वितः । डाद्दध्नः संस्कृतेऽर्थे ष्णिकः स्यात्, उदश्वितस्तु (३) वा । दध्नि संस्कृतं दाधिकम् । तेन संस्कृतमित्यत्र दधिक्तमेवोत्कर्षाधानम्, इह तु द्रव्यान्तरेण लवणादिना आधारभूतं दधि संस्क्रियत इति भेदः । अन्ये तु दध्नि संस्कृतमित्यर्थविवक्षायां ष्णो मा भूदित्येतदर्थमित्याहुः । उदश्वितं संस्कृतम् औदश्वित्कं, तादिकस्य कः । पक्षे औदश्वितम् ।

---

(१) भ्राष्ट्रः भर्ज्जनपात्रम् । (२) पिठरः स्थाली ।

(३) उदश्वित् अर्द्धाम्बुतक्रम् ।

क्षीरात् ष्णेयः। डात् क्षीरात् संस्कृते भक्ष्येऽर्थे ष्णेयः स्यात्। क्षीरे संस्कृता क्षैरेयी यवागूः।

शूलोखाभ्यां यः। डाभ्यामाभ्यां संस्कृते भक्ष्येऽर्थे यः स्यात्। शूले संस्कृतं शूल्यम्; उखायां संस्कृतम् उख्यं मांसम्।

भवे। डाङ्गवेऽर्थे वेत्यादित्वात् ष्णः स्यात्। श्नुघ्ने भवः श्नौघ्नः, माथुरः, श्रेयसि भवः श्रायसः। आदाद्यचो णित्ते शिंशपेत्यादिनाद्यच आत्। एवं दार्घसत्रं दाविकम्। यमादेस्तु याम्यः प्राजापत्यः पाशुपतः आग्नेय औलः। भवादित्वात् गार्गीयः काशिकः राष्ट्रिय इत्यादि।

अध्यात्मादेः ष्णिकः। डादध्यात्मादेर्भवेऽर्थे ष्णिकः स्यात्। अध्यात्मे भव आध्यात्मिकः। अध्यात्मादिर्यथा—

अध्यात्ममुपजानूपकर्णं स्यादुपनीवि च।
अधिभूताधिदेवञ्च स्वग्रामोर्ङन्दमं तथा।
ऊर्ङ्देहः समानादि-र्लोकोत्तरदमेव च।
स्वाध्याय-चतुरर्थे च कदाचिदिह षोड़श।
अध्यात्मादाविह प्रोक्ताः समानोऽन्ये प्रयोगतः।

अध्यात्मादयः षट् क्रतवाः (१)। आधिभौतिकम् आधिदैविकं सुभगादित्वात् द्वयोर्द्वयोर्व्रिः। ऊर्ङ्दमशब्द ऊर्ङ्समानार्थः। समानादेस्तावत्—समानदेशिकः समानग्रामिकः। लोकोत्तरदात्तावत्—ऐहलौकिकः पारलौकिकः, द्वयोर्द्वयोर्व्रिः। चतुरर्थे

(१) अव्ययीभावसमासनिष्पन्नाः।

भवः चातुरर्थिकः । अत्र पांठात् ग-वाचे न लुक् त्यस्य । भूले ऐहिकमिति । एवं कादाचित्कम् । समाने भवः सामानिकः । अस्याकृतिगणत्वात् शेषे भवः शैषिकः ।

वादन्तःपूर्व्वात् । डात् कृतवात् अन्तःशब्दपूर्व्वात् भवेऽर्थे ण्णिकः स्यात् । अन्तरगारे भवः आन्तरगारिकः आन्तर्ग्रहिकः । अन्तःशब्दस्याधिकरणप्रसिद्धत्वात् स्त्यर्थे वसः ।

ग्रामात् पर्य्यनुपूर्व्वात् । डात् कृतवात् पर्य्यनुपूर्व्वाद् ग्रामाद्-भवेऽर्थे ण्णिकः स्यात् । परिग्रामे भवः पारिग्रामिकः आनु-ग्रामिकः । आभ्यामिति किं ? मूले ग्रामीणः ग्राम्य इति पारा-दित्वात् ईनः दिवादित्वात् यः ।

प्राग्वङ्गदिगादिभ्यां यो देवादेस्तु णित् । ङेभ्यः प्राग्वङ्ग-वाचिभ्यो दिगादिभ्यश्च भवेऽर्थे यः स्यात्, णित्तु देवादेः । मूले मूर्द्धन्यमिति मूर्द्ध्नि भवमिति वाक्यम् । एवं हृद्यं कण्ठ्यं तालव्य-मित्यादि । दिगादेस्तावत्—दिशि भवं दिश्यम् । दिगादिर्यथा—

दिक्-पक्ष-मृग-पन्थानोऽलीक-शाखि(१)रहो(२)गणाः ।
वर्ग-मित्राऽन्तराऽऽकाश-वेश्म-कालादयो (३) मुखम् ॥
जघन मेघ-यूथाऽन्ता न्याय-धार्य्यावुखा(४)पि च ।
मेधोऽनुवंशो वंशोऽथ संज्ञायामुदकं मतम् ॥

अत्र ये हृद्यास्तेभ्य ईयः शेषेभ्यः ण्यो बाध्यते । मुखजघनयोः प्राग्वङ्गवचनत्वेऽपि प्राग्वङ्गभिन्नेऽपि यप्राप्त्यर्थः पाठः । उदके

---

(१) साखिन् इत्यन्यत्र पांठः ।
(२) रहस्शब्दः ।
(३) काल, आदि ।
(४) उखाशब्दः ।

भवा उदक्या रजस्वला। नात्र प्रकृतिप्रत्ययार्थेन शब्दवृत्तिः। संज्ञायामिति किम्? औदका मत्स्याः। देवादेस्तावत्—देवे भवं दैव्यम्। यद्यपि यमादित्वात् दैव्यमिति सिध्यति तथापि भवार्थे दैवमिति वारणार्थम्। देवादिर्यथा—

देवः पञ्चजनं चैव गम्भीरोऽथ व-से परे।
परिसीरानुसीरोपसीरोपलवणमेव च॥
पर्य्यौष्ठोपकलापानुशीतं परिमुखं तथा।
परिहन्वनुगङ्गानुमाषानुयवमेव हि॥
अनुवंशं परिखलाऽनुपथानुतिलन्तथा।
अनुसूपमथो यज्ञे चतुर्म्मासं प्रकीर्त्तितम्॥

अथानन्तरं परे शब्दाः परिसीरादयः सप्तदश व से देवादौ पठ्यन्ते। पूर्व्व(१)मनुवंशशब्दोऽवसे। परिमुखमित्यत्र सर्व्वतो-भावार्थ-परिशब्दस्य योगविभागात्. इह व-सग्रहणज्ञापकाद्वा व-सः (२)। चतुर्षु मासेषु भवः चातुर्म्मास्यो यज्ञः।

मूले नादेयमिति नद्यादित्वात् ढेयः। शालीयमिति वृद्धादीयः, शालायां भव इति वाक्यम्। नागर इति ढः।

अग्रात् येयेयाः। डादग्रशब्दात् य इय ईय एतेष्वर्थेषु

---

(१) पूर्व्वं दिगादावित्यर्थः।

(२) वर्জ্জनार्थं परिशब्देन सह पञ्चम्यन्तपदस्याव्ययीभाव इति वक्तव्ये "आङ्पर्य्यपपरिरञ्चां प्या" इति वार्त्तिकसूत्रेण प्ये कृते [illegible] सह-पञ्चम्यन्तभिन्नपदस्याव्ययीभाव इति निर्णयः। तेनाव [illegible] मित्यव्ययी भावः। पञ्चान्तरमध्याहृत्य [illegible] समासनिष्पादितशब्दानां मध्ये पञ्चम्यन्तेनाव्ययीभाव [illegible]

४३१। व्यटे र्लोपो ऽनाराच्छश्वतोऽच्यै ऽयौ।

(व्य-टेः ६।, लोपः १।, अनारात्-शश्वतः ६।, अच्-यै ७।, अयौ ७।)।

पौनः पुनिकः, बाह्यः वाह्नीकः।

४३२। न दं तसौ त्वस्त्यर्थे च।

(न।१।, दं १।, त-सौ १॥, तु।१।, अस्त्यर्थे ७।, च।१।)।

मूले अग्रमिति, अग्रियम् अग्रीयम्। परैकदशिनः तदन्तादपीच्छन्ति तेनात्यग्रमित्यादि।

४३१। व्यटेः। व्यस्य टिः व्यटिः तस्य। आराच्च शश्वच्च तत्, न तत् अनाराच्छश्वत् तस्य। अच्च यश्च अच्यं तस्मिन्। नास्ति युर्यस्मिन् सः अयुस्तस्मिन्। आराच्छश्वद्वर्जितस्य व्यस्य टेर्लोपः स्यात् अचि ते युवर्जिते ये च। पौनः पुनिक इति पुनःपुनर्भव इति वाक्यम्, अध्यात्मादेराकृतिगणत्वात् ष्णिकः, अनेन टिलोपः। अयाविति किम् अहंयुः।

वह्निषो ण्यणीकौ। डाद्वह्निस्शब्दात् भवेऽर्थे ण्यणीकौ स्याताम्। मूले बाह्य इति, पक्षे वाह्नीकः, वह्निर्भव इति वाक्यम् अनेन त्ये पूर्वेण टिलोपः।

४३२। नदम्। अच्ये यावित्यनुवर्त्तते। तश्च सश्च तौ। अस्ति अर्थो यस्य तस्मिन्। तस्मिन्निति निर्दिष्टे पूर्वस्येति न्यायात् पूर्वदमाक्षिपतीत्यत आह पूर्वं दसंज्ञं न स्यादिति। अत्र क्तेर्लुकि लुप्तक्तिमाश्रित्य दत्वे अनेन निषिध्यते आरातीय इति।

अयावचि ये च ते पूर्वं दसंज्ञं न स्यात् तान्त सान्तौ तु अस्त्यर्थे च।

आरातीयः शाश्वतिकः।

आराद्भव इति वाक्यं, ह्रस्वसंज्ञकत्वादीयः अनेन दत्वनिषेधान्न चपोऽबे जब्।

क्यङ्यै च। क्ये ङ्ये च पूर्वं दसंज्ञं न स्यात्। गामिच्छति गव्यति, गौरिवाचरति गव्यते इत्यादौ दान्तत्वात् वाव गोर्दान्ते इति न अवादेश इति, एवं तड़ितमिच्छति तड़ित्यतीत्यत्र न चपोऽबे जब्, नमस्यति इत्यत्र न विः।

शश्वतः ष्णिको वा न कश्च। डाच्छश्वच्छब्दात् ष्णिको वा स्यात् ष्णिकस्य न कश्च। मूले शाश्वतिक इति, शश्वत् त्रिषु कालेषु भवः विद्यमान इत्यर्थः। पक्षे शाश्वतः न टेर्लोपः न चपोऽबे जब्च।

अहि वस्त्यस्ति कुक्षि इति कलसिभ्यः (१) ष्णेयो ग्रीवायाः ष्णश्च। डेभ्य एभ्यो भवार्थे ष्णेयः स्यात् ग्रीवायाः ष्णेयष्णौ। अहौ भवम् आहेयं वास्तेयम्, अस्तीति त्यन्तप्रतिरूपनिपातस्य धनवाचकस्यास्तिशब्दस्य ग्रहणम्, आस्तेयं कौक्षेयं दार्क्षेयं कालसेयं ग्रैवेयं ग्रैवम्।

अङ्गुलिजिह्वामूलाभ्यामीयः। डाभ्यामाभ्याम् ईयः स्यात्

---

(१) कलसिशब्दोऽत्र ह्रस्वान्तः। तथाच माघः—कलसिसदधिगुर्वी मां बोड़यन्तीति—इति तद्धितपादे ४७६ सूत्रे गोयीचन्द्रः।

भवेऽर्थे । अङ्गुलौ भवः अङ्गुलीयः जिह्वामूलीयः । कथं मुखतीयः पार्श्वतीयः (१) ? गह्वादित्वात् ।

वर्गान्ताच्च । डाद्वर्गान्ताङ्गवेऽर्थे ईयः स्यात् । कवर्गे भवः कवर्गीयः पवर्गीयः । वर्गान्तादिति किं ? वर्ग्यः दिगादित्वात् यः ।

अशब्दे येनौ च । डाद्वर्गान्तात् य ईन ईय एते स्युः भवेऽर्थे न तु शब्दे वाच्ये । क्षणवर्गे भवः क्षणवर्ग्यः क्षणवर्गीणः-क्षणवर्गीयः । शब्दे तु कवर्गीयो वर्णः ।

मध्यान्मणीयदिनसीया दस्य नुम् च । डान्मध्यादेते (२) स्युः भवेऽर्थे, दस्य नुम् च, उम् इत् । मध्ये भवः माध्यमः मध्यमीयः माध्यन्दिनः मध्यीयः ।

कर्णललाटाभ्यां कोऽलङ्कारे । डाभ्यां भवेऽर्थे कः स्यात् भूषार्थे । कर्णे भवोऽलङ्कारः कर्णिका, ललाटिका, यस्यापवादः । अलङ्कार इति किम् ? कर्ण्यं ललाट्यम् ।

त्यामाजिनान्तालुक् । डात् त्यामान्तादजिनान्ताच्च भवेऽर्थे विहितस्य त्यस्य लुक् स्यात् । अश्वत्थाम्नि भवः अश्वत्थामा वृकाजिनः सिंहाजिनः ।

ग्रन्थादनेकाचः ष्णिकः । डात् ग्रन्थवाचकादनेकाचः ष्णिकः स्यात् भवेऽर्थे । इष्टौ भवः ऐष्टिकः पाशुकः । एकाचस्तु सुपि भवः सौपः तैङः ।

---

(१) सुखतस् पार्श्वतस् शब्द्योरव्ययत्वादीये टे लोपः ।

(२) मण् मीय दिनण् ईय प्रत्ययाः ।

बह्वचोऽन्तोदात्ताच्च। डादन्तोदात्ताद्बह्वचो ग्रन्थाङ्गवेऽर्थे ष्णिकः स्यात्। षत्वञ्च णत्वञ्च षत्व-णत्वे, तयोर्भवः षात्वणत्विकः, स-स्वरेणान्तोदात्तः(१)। अन्तोदात्तादिति किम्? संहितायां भवः सांहितः, प्रादि-स-स्वरेणाद्युदात्तः। पूर्वेणैव सिद्धे अनन्तोदात्ताद्-बह्वचः ष्ण एव, पृथग्विधानात्।

ऋट्टक्पुरश्चरणाख्यातेभ्यः। ऋदन्तात् ऋक्शब्दात् पुर-श्चरणशब्दात् आख्यातशब्दाच्च डात् ष्णिकः स्यात् भवेऽर्थे। पञ्चसु होत्रेषु भवः पाञ्चहोत्रिकः, ऋचि भवः आर्च्चिकः, एकाच्-त्वात् ष्णस्यापवादः, पौरश्चरणिकः आख्यातिकः, अनन्तोदात्तत्वात् ष्णस्यापवादः।

ऋषेरध्याये। डाट्टथभिधानग्रन्थवाचकात् भवेऽर्थे ष्णिकः स्यादध्याये वाच्ये। ऋषिशब्द उपचारात् ग्रन्थविशेषमभिधत्ते। वशिष्ठे भवः वाशिष्ठिकः वैश्वामित्रिकः। अध्याय इति किं? वाशिष्ठी ऋक्।

यज्ञक्रतुवाचिभ्याम्। डाभ्यां यज्ञवाचिभ्यां क्रतुवाचिभ्याञ्च ष्णिकः स्यात् भवार्थे। अनन्तोदात्तार्थं आरम्भः। नवयज्ञे भवः नावयज्ञिकः। क्रतुभ्यस्तावत्—राजसूयिकः वाजपेयिकः। क्रतुभ्य इत्येव सिद्धे यज्ञग्रहणमसोमयागे यथा स्यात्, पाञ्चौदनिकः (२)।

---

(१) से समासे स्वर उदात्तादिस्तेन।

(२) सोमसाध्येषु यागेष्वेतौ (क्रतुयज्ञशब्दौ) प्रसिद्धौ। तत्रान्यतरोपा-दानेन सिद्धे उभयोरुपादानसामर्थ्यादसोमका अपीह गृह्यन्ते इति सिद्धान्त-कौमुदी (४।३।६८)।

पुरोडाशपौरोडाशाभ्यामणित्। डाभ्यामाभ्यां ग्रन्थाभ्यां भवेऽर्थे ष्णिकोऽणित् स्यात्। पुरोडाशः पिष्टकपिण्डः तत्र भवः पुरोडाशिकः। पुरोडाशिकी ऋक्। पुरोडाशसंस्कारको मन्त्रः पौरोडाशः तत्र भवः पौरोडाशिकः पौरोडाशिकी। पौरोडाश-शब्दादन्तोदात्तात् पूर्वेण ष्णिकविधाने पौरोडाशिकः पौरोडाशिकीति सिद्धे पौरोडाशग्रहणं पुंवद्भावनिषेधाभावार्थमिति।

ष्ण ऋगयनादेश्छन्दसो यश्च। डाट्टगयनादेर्ग्रन्थाद्भवेऽर्थे ष्णः स्यात्, छन्दसस्तु य-ष्णौ। ऋगयने भवम् आर्गयनम्।

ऋगयनादिर्यथा—

ऋगयन-विद्या-निगम-न्यायं छन्दोभाषोत्पाद-पुनरुक्तम् (१)।
छन्दोविचिति-छन्दोविजिनी-छन्दोमान-व्याकरणानि।
अङ्गविद्या त्रयीविद्या पदव्याख्यानमेव च।
छन्दोव्याख्यानोपनिषच्छिक्षासंवत्सरादयपि॥
उत्पातश्च मुहूर्त्तश्च क्षेत्रविद्या तथैव च।
वास्तुविद्या निमित्तञ्च निरुक्तं परिकीर्त्तितम्॥

छन्दसि भवः छन्दस्यः छान्दसश्च। सर्व्वस्मात् ष्णिको बाध्यते।

सख्वाः ष्णे यलोपः। सख्यां भवः सारवः, अत्र यलोपः। भवे किम्? सख्यां जातः सारयवः।

जाते। डादित्येव। तज्जातेऽर्थे वेत्यादित्वात् ष्णः स्यात्। भवजातयोरयं भेदः, भवो विद्यमानः जात उत्पन्नः। शुक्ले जातः

---

(१) छन्दोभाषा, उत्पादः।

श्रौघ्नः माथुरः। यमादेस्तु याम्यः आदित्यः आग्नेयः कालेयः प्राजापत्यः पाशुपतः औत्स इत्यादि। भवादित्वात् गार्गीयः शालीयः नादेयः कालिकः राष्ट्रिय इत्यादि।

प्राहृष इकः। प्राहृषि जातः प्राहृषिकः, एण्यस्यापवादः।

नाम्नि शरदो णकः। डाच्छरच्छब्दात्मकः स्यात् जातेऽर्थे, त्यान्तेन संज्ञा चेन्नम्यते। शरदि जाताः शारदकाः मुन्नाः दर्भाश्च। अनाम्नि तु शारदिकं, यथाप्राप्तम्।

मूलार्द्रावस्करप्रदोषपूर्व्वाह्णापराह्णात् कः। डेभ्य एभ्यो जातेऽर्थे कः स्यात् नाम्नि। मूले जातः मूलकः, आर्द्रायां जातः आर्द्रकः, केऽकः स्व इति स्वः। अवस्करकः प्रदोषकः पूर्व्वाह्णकः अपराह्णकः, अनाम्नि तु यथाप्राप्तम्।

पथः पन्थश्च। के पथः पन्थादेशश्च। पथि जातः पन्थकः।

अमावास्यामावस्याभ्यामश्च वा। डाभ्यामाभ्यां कः अश्च वा स्यात् जातेऽर्थे संज्ञायाम्। अमावास्यायां जातः अमावास्यकः अमावास्यः। पक्षे पलद्यादिषुः आमावास्यः। एवम् अमावस्यकः अमावस्यः आमावस्य इति।

सिन्ध्वपकराभ्यां कः ष्ण-ट्णौ च। डाभ्यामाभ्यां जातेऽर्थे कः स्यात् ष्ण-ट्णौ च क्रमात् स्याताम्। सिन्धौ जातः सिन्धुकः, ष्णे सैन्धवः, कच्छादिपाठात् नृतत्स्थयोर्णकस्यापवादः। अपकरे जातः अपकरकः, ट्णे आपकरः। एतत्पर्य्यन्तं नाम्नीत्येकदेशिनः।

तिष्य-पुनर्व्वसु-स्वाति-हस्ता-विशाखा-बहुलाभ्यो लुक्। एभ्यो जातार्थस्य त्यस्य लुक् स्यात्। तिष्ये जातः तिष्यः पुनर्व्वसुः

स्वातिः हस्तः विशाखः, बहुलाः कृत्तिकाः तासु जातः बहुलः; तस्य लुकि स्त्रीत्यस्य लुक्।

नक्षत्रेभ्यो वा। नक्षत्रवाचिभ्यो जातार्थत्यस्य लुग्वा स्यात्(१)। अश्विन्यां जातः अश्वी. ष्णे तस्य लुकि स्त्रीत्यस्य लुक्, पक्षे आश्विनः। अश्वयुक् आश्वयुजः, रोहिणः रौहिणः, मृगशिराः मार्गशीर्षः, अभिजित् आभिजितः, चित्रः चैत्रः, श्रवणः श्रावणः; रेवतः रैवतः।

वत्सशालात्। वत्सशालशब्दाज्जातार्थत्यस्य लुग्वा स्यात्। वत्सशाले जातः वत्सशालः पक्षे वात्सशालः।

फल्गुनीशतभिषग्भ्यां टडौ च। आभ्यां जातार्थत्यस्य लुक् वा स्यात् लुकि सति क्रमाट्टडौ वा स्याताम्। फल्गुन्यां जातः फल्गुनः, टपक्षेऽपि फल्गुनः। स्त्रियां फल्गुना फल्गुनी च, टे कृते टित्त्वादीप्। उभयत्यक्तपक्षे फाल्गुनः, फाल्गुनी (२)। शतभिषजि जाता शतभिषा, डिति टिलोपः लोपे अतः आप्; डाभावपक्षे शतभिषक्, लुगभावपक्षे शातभिषजी।

श्रविष्ठाषाढ़ादीयणीयौ च वा। आभ्यां जातार्थत्यस्य लुग्वा स्यात् लुकि ईयः णीयश्च वा। श्रविष्ठायां जातः श्रविष्ठः श्रविष्ठीयः श्राविष्ठीयः, लुगभावपक्षे श्राविष्ठः। आषाढ़ायां जातः आषाढ़ः आषाढ़ीयः, लुगभावपक्षे आषाढ़ः। अन्ये तु अषाढ़ेति ह्रस्वादि,

---

(१) विशेषविधिशेषोऽस्य विषयः।

(२) उभयं लुक् टप्रत्ययश्च तयोरभावपक्षे ष्णे स्त्रिग्रामीप्।

तथाच "यद्रोहिणीयोगफलं तदेव भवेदषाढ़ासहिते च चन्द्र" इति वराह इत्याहुः।

स्थानान्त-खरशाल-गोशालाल्लुग् नित्यम्। एभ्यो जातार्थत्यस्य लुक् नित्यं स्यात्। गोस्थाने जातः गोस्थानः महिषस्थानः खरशालः (१) गोशालः। एभ्यः किं? स्थाने जातः स्थानीयः माहिषशालः।

स्त्रियां चित्रारोहिणीरेवतीभ्यः। आभ्यो जातार्थत्यस्य नित्यं लुक् स्यात् स्त्रियां वाच्यायाम्। चित्रायां जाता चित्रा, रोहिणी रेवती कन्या, उभयत्र नदादेराकृतिगणत्वादीप्। स्त्रियामिति किं? चित्रायां जातः चैत्रः रौहिणः रैवतः।

न मघादेः। मघादेर्जातार्थत्यस्य लुक् न स्यात् (२)। मघासु जातः माघः, अश्वत्थेषु जातः आश्वत्थः, प्रोष्ठपदासु जातः प्रोष्ठपादः, सुपश्चालादित्वात् अन्त्यदस्य त्रिः।

कृत-लब्ध-क्रीतेषु। डादित्यनुवर्त्तते। डादेष्वर्थेषु वेत्यादित्वात् ष्णः स्यात्। शुभ्रे कृतो लब्धः क्रीतो वा शौभ्रः माथुरः यमादेशु याम्यः आदित्यः आग्नेयः कान्तेयः प्राजापत्यः मैत्रपतः श्रौत्स इत्यादि। भवादित्वात् गार्गीयः नाडीयः इत्यादि।

कुशले। डात् कुशलेऽर्थे वेत्यादित्वात् ष्णः [illegible]

(१) खराणां शाला इति विग्रहे वा तु लुक् [illegible] इत्यनेन क्लीवत्वे ह्रस्वः।

(२) नक्षत्रेभ्यो वा इत्यतः [illegible] लुग् निषिध्यते

कुशलः श्रौघ्नः एवं माथुरः । यमादेस्तु याम्यः श्रौत्स इत्यादि । भवादित्वात् गार्गीयः नादेयः राष्ट्रिय इत्यादि ।

पथ्यादेरकः । ङात् पथ्यादेरकः स्यात् कुशलार्थे । पथि कुशलः पथकः । पथ्यादिर्यथा—

पन्थाः पिचिण्डा निचयाश्मक्षादा-
ह्लादा नया-कर्ष जयैः पिशाचः ।
पथ्यादयश्चेह दशैव सिद्धा (१)
भाष्यादिशास्त्राणि बुधैर्विचार्य्य ।

त्सरु-शकुन्यश्वनिभ्यः कः । ङेभ्य एभ्यः कुशलार्थे कः स्यात् । त्सरौ कुशलः त्सरुकः शकुनिकः अश्वनिकः ।

प्रायभवे । ङात् प्रायभवेऽर्थे वेत्यादित्वात् ष्णः स्यात् । स्रुघ्नः प्रायभवः प्रायेण बाहुल्येन भवः श्रौघ्नः, माथुरः । यमादेस्तु याम्यः आदित्यः आग्नेयः प्राजापत्यः पाशुपतः श्रौत्स इत्यादि । भवादित्वात् गार्गीयः नादेयः राष्ट्रिय इत्यादि ।

उपनीव्युपजानूपकर्णात् ष्णिकः । ङेभ्यः एभ्यः प्रायभवेऽर्थे ष्णिकः स्यात् । उपनीविनि प्रायभवः औपनीविकः, औपजानुकः औरिकस्य कः, औपकर्णिकः ।

सम्भूते । ङात् सम्भूतेऽर्थे वेत्यादित्वात् ष्णः स्यात् । अत्र सम्भूतशब्देन सत्तोत्पत्ती नोच्येते भवजाताभ्यामनुगतार्थत्वात्, किन्तु आधाराधेययोरन्यूनानतिरिक्तता । स्रुघ्ने सम्भूतः श्रौघ्नः माथुरः ।

---

(१) सिद्धा अनुशिष्टाः ।

यमादेस्तु याम्यः आदित्यः आग्नेयः कालेयः प्राजापत्य औत्स इत्यादि। भवादित्वात् गार्गीयः नादेयः राष्ट्रिय इत्यादि।

कोषाद्वस्त्रभेदे ष्णेयः। डात् सम्भूतेऽर्थे वस्त्रविशेषे वाच्ये ष्णेयः स्यात्। कोषे सम्भूतं कौषेयं कृमिकोषोत्थं वस्त्रम्। वस्त्रभेद इति किं? कौषः कृमिः।

कालेभ्यः साधुपुष्यत्पच्यमानेषु। डेभ्यः कालवाचिभ्य एष्वर्थेषु भवादित्वात् यथाविहितं त्याः स्युः। हेमन्ते साधुः पुष्यति पच्यते वा हैमन्तिकः हैमन्तः हैमनः, वासन्ती कुन्दलता, शारदाः शालयः, प्रावृषेण्याः तिला इत्यादि। पुष्य विकसने शतृ पुष्यत्। डुपचष्पच पाके, ढचे शानः, पच्यमानः।

उप्ते च। डेभ्यः कालवाचिभ्यः उप्तेऽर्थे भवादित्वात् यथाविहितं त्याः स्युः। हेमन्ते उप्यन्ते हैमन्तिकाः हैमन्ता हैमना यवाः, प्रावृषेण्यास्तिलाः, शारदा मुद्गा इत्यादि। पृथग्योग उत्तरार्थः (१)।

आश्वयुज्या णकः। डादाश्वयुजीशब्दादुप्तेऽर्थे णकः स्यात्। आश्वयुज्यामुप्तः आश्वयुजको माषः, आश्वयुजी आश्विनी पौर्णमासी।

ग्रीष्मवसन्ताभ्यां वा। डाभ्यामाभ्यामुप्तेऽर्थे णकः स्यात् वा। ग्रीष्मे उप्तः ग्रैष्मकः वासन्तकः, पक्षे ग्रैष्मः वासन्तः।

देय ऋणे। डेभ्यः कालवाचिभ्यो देयेऽर्थे भवादित्वात्

---

(१) उप्तस्य पूर्वसूत्रे निर्देशेनैव सिद्धे पृथग्विधानं परत्वात्तदुत्पत्त्यर्थमिति-भावः।

यथाविहितं त्याः स्युः, यद्देयं तद्देयं चेज्जवति । मासे देयमृणं मासिकम् आर्द्धमासिकं सांवत्सरिकं, सन्ध्यायां देयमृणं सान्ध्यं पलद्यादित्वात् ष्णः ।

अश्वत्थ-कलापि यव-वुषादकः । डेभ्य एभ्यः कालवाचिभ्यो देयर्णेऽर्थे अकः स्यात् । यस्मिन् काले ऽश्वत्थः फलिनः, मयूराः कलापिनः (१) यववुपमुत्पद्यते स कालः साहचर्य्यादश्वत्थादिभिरुच्यते । अश्वत्थे देयमृणम् अश्वत्थकं कलापकं यववुषकम् ।

ग्रीष्मावरसमाभ्यां णित् । डाभ्यामाभ्यां देयर्णेऽर्थे अको णित् स्यात् । ग्रीष्मे देयमृणं ग्रैष्मकम्, अवरसमायां देयमृणम् आवरसमकम् । अवरसमाशब्देनागामिवत्सर उच्यते ।

संवत्सराग्रहायणीभ्यां णिकञ्च । डाभ्यामाभ्यां देयर्णेऽर्थे णकणिकौ स्याताम् । संवत्सरे देयमृणं सांवत्सरकं सांवत्सरिकम् आग्रहायणकम् आग्रहायणिकम् । ननु वेति कृते सिद्धे णकाभावपक्षे कालवाचित्वात् णिको भविष्यति किमिह णिकविधानेनेति चेत् सत्यं, पलद्यादौ फलपर्व्वणोः (२) संवत्सरशब्दस्य पाठात् देयर्णत्वेन फले विवक्षितं (३) णिकं बाधित्वा णः प्रवर्त्तते, तद्बाधनाय इदमिति ।

व्याहरति मृगे । कालेभ्य इति प्रवर्त्तते । डेभ्यः कालवाचिभ्यो व्याहरतीत्यर्थे भवादित्वात् यथाविहितं त्याः स्युः, यो

---

(१) यस्मिन् काले मयूराः कलापिनो भवन्ति स कालः कलापीति ।

(२) फले पर्व्वणि च वाच्ये इत्यर्थः ।

(३) देयर्णस्य फलत्वविवक्षायामित्यर्थः ।

व्याहरन् स मृगश्चेद्भवति । निशायां व्याहरन् (१) मृगः नैशिको नैशः, प्रादोषिकः प्रादोषः, हैमन्तिकः हैमन्तः, प्राह्णेय इत्यादि । मृग इति किं ? निशायां व्याहरन्नरः । कालेभ्यः इति किं ? वने व्याहरति मृगः ।

ष्णिको नियुक्ते । लेर्डान्नियुक्तेऽर्थे ष्णिकः स्यात् । द्वारे नियुक्तो दौवारिकः, धर्म्मे नियुक्तः धार्म्मिकः ।

अगारान्तादिकः । डादगारान्तान्नियुक्तेऽर्थे इकः स्यात् । देवागारे नियुक्तः देवागारिकः ।

निषिद्धदेशकालाभ्यामधीते ष्णिकः । डाभ्यां निषिद्धदेश-कालाभ्यामधीतेऽर्थे ष्णिकः स्यात् । चतुष्पथेऽधीते चातुष्पथिकः चातुर्ह्यथिकः ।

कठिनान्त-प्रस्थान-संस्थानेभ्यो व्यवहरति (२) । डेभ्य एभ्यो व्यवहरतीत्यर्थे ष्णिकः स्यात् । वंशकठिने व्यवहरति वांशकठि-निकः प्रास्थानिकः सांस्थानिकः ।

वसति निकटात्, षिकस्त्वावसथात् । डान्निकटशब्दाद्वसतीत्यर्थे ष्णिकः स्यात्, आवसथात्तु षिकः । निकटे वसति नैकटिकः, आव-सथिकः । स्त्रियाम् आवसथिकी आवसथिकभार्य्यः, पुंवद्भावः (३) ।

पृथिवीसर्व्वभूमिभ्यां ट्ण-ष्णौ विदिते । डाभ्यामाभ्यामेतौ

---

(१) शब्दायमानः ।

(२) प्रस्थान इत्यत्र प्रस्तार इत्यपि क्वचित् पाठः ।

(३) ष्णित्त्वान्तत्वाभावादितिशेषः ।

क्रमात् स्याताम् विदितेऽर्थे । पृथिव्यां विदितः (१) पार्थिवः; सर्व्वभूमौ विदितः सार्व्वभौमः, सुभगादित्वाद्वयोर्दयोर्व्रिः ।

लोक-सर्व्वलोकाभ्यां ष्णिकः प्रसिद्धे च । आभ्यां प्रसिद्धे विदिते चार्थे ष्णिकः स्यात् । लोके प्रसिद्धो विदितो वा लौकिकः, सार्व्वलौकिकः, द्वयोर्दयोर्व्रिः ।

कालेभ्यो दीयते कार्य्ये वा भववत् । ङेभ्यः कालवाचिभ्यो दीयते कार्य्ये वा अर्थे भववत् त्याः स्युः । मासे दीयते कार्य्यं वा मासिकम्, आर्द्धमासिकं सांवत्सरिकं प्रावृषेण्यं हैमन्तं हैमनमित्यादि ।

व्युष्टादेः णः । ङाद्युष्टादेर्दीयते कार्य्ये वा अर्थे णः स्यात् । व्युष्टे (२) दीयते कार्य्यं वा वैयुष्टम् । व्युष्टादिर्यथा—

व्युष्ट-संघात-नित्योपवास-तीर्थ-प्रवेशनम् ।
प्रवास-निष्क्रमौ पीलुमूलाऽग्निपदमित्यपि ॥

यः साधौ । ङात् साधावर्थे यः स्यात् । सामनि साधुः निपुणो योग्यो वा सामन्यः । एवं ब्रह्मण्यः कर्म्मण्यः सभ्यः ।

प्रतिजनादेर्णीनः । ङात् प्रतिजनादेर्णीनः स्यात् साधावर्थे । प्रतिजनं साधुः प्रातिजनीनः । प्रतिजनादिर्यथा—

प्रतिपञ्चमहद्दिश्वसर्व्वादिजन-संयुगौ ।
परपूर्व्वकुलाऽमुष्यकुलं सम-परायुगम् ।
इदंयुगमिह प्रोक्ता दश एकाधिका बुधैः ॥

---

(१) विदितो ज्ञातः प्रकाशित इत्यर्थः इति काशिका (५।१।४२) ।

(२) व्युष्टे प्रभाते ।

जनं जनं प्रति प्रतिजनं वीप्सायां वसः, प्रतिसंयुगीनमित्यादि । अमुष्य कुलमिति न ष्या लुक्, आमुष्यकुलीनः (१) ।

भक्तात्रः परिषदो ण्यश्च । डात् भक्तशब्दात् साधावर्थे णः स्यात्, परिषदस्तु ण्यश्च । भक्ते साधुः भाक्तः शालिः । पारिषदः पारिषद्यः । परे तु परिषच्छब्दात् णं नेच्छन्ति ।

कथादेः षिणकः । डात् कथादेः साधावर्थे षिणकः स्यात् । कथायां साधुः काथिकः । कथादिर्यथा—

कथा वितण्डा-जनवादबोधौ गुणो गणो वेणुगुहौ निवासः ।
शक्तूपवासौ विसुधा च वृत्तिः प्रवास-मांसौदन-संग्रहाश्च ।
विकर्षेक्षुः क्षणविदायुर्वेदौ निसुधा तथा ।
कुल्माषापूप-संग्राम-सङ्घाताः पञ्चविंशतिः ॥

पथ्यादेः ष्णेयः । डात् पथ्यादेः साधावर्थे ष्णेयः स्यात् । पथि साधु पाथेयं, स्वापतेयं धनम् । पथ्यादिर्यथा—

पथ्याश्च स्वपतिश्चैवातिथिर्वसतिरित्यपि ।

सतीर्थ्याद्यो वासिनि । डात् सतीर्थशब्दात् यः स्यात् वासिनि वाच्ये । सतीर्थे वासी सतीर्थ्यः, एकगुरुसमीपे यस्य वासोऽस्ति स इत्यर्थः ।

सोदर-समानोदराच्छयितरि । डाभ्यामाभ्यां शयितर्य्यर्थे यः स्यात् । सोदरे शयिता सोदर्य्यः समानोदर्य्यः ।

सगर्भ-सयूथाभ्यामनुज-सहचारिणोः । डाभ्यामाभ्यां क्रमादनयोरर्थयोर्यः स्यात् । समानो गर्भः सगर्भः तत्रानुजः सगर्भ्यः,

(१) अत्र अदसः ष्णायनणीनणक्रान्तकुलणक्रान्तपुत्रेषु इति वार्त्तिकम् ।

४३३। अङ्कोऽङ्कोऽनीने।

(अङ्कः ६।, अङ्कः १।, अनीने ७।)।

आङ्किकम्। ईनेतु द्वयहीनः।

सुपाञ्चालकः अर्द्धपाञ्चालकः।

समानं यूथं सयूथं तत्र सहचारी सयूथ्यः। अन्ये तु छान्दसमित्यप्याहुः।

४३३। अङ्को। न ईनः अनीनः तस्मिन्। तथाच अहन् इत्यस्य ईनभिन्ने ताद्धि युभिन्ने तये च अङ्क इत्यादेशः स्यात्। आङ्किकमिति—अङ्कि भवमिति वाक्यं, कालवाचित्वात् ष्ठिकेऽनेनाङ्कादेशः। द्वयहीन इति—द्वे अहनी अधीष्टो भूतो भावी वा इत्यर्थे गात् रात्रयहः संवत्सरादितीनः, (१) सान्तविधेरनित्यत्वात् षत्वाभावेन (२) सर्व्वैकदेशेत्यादिना नाङ्कादेशः(३)। अथवा अत्र ईनवर्ज्जनज्ञापकात् षत्वे कृतेऽपि नाङ्कादेशः।

सुपञ्चालादेरन्त्यस्य दस्य त्रिं दर्शयति सुपाञ्चालक इति—शोभनाश्च ते पञ्चालाश्चेति सुपञ्चालास्तत्र भव इत्यर्थे व्वविषयाद्वृद्धाच्चेति णकः (४)। पञ्चालानाम् अर्द्धम् अर्द्धपञ्चालास्तत्र भवः अर्द्धपाञ्चालकः पूर्व्ववत्सकः। पञ्चालादिः प्रागुक्तः।

---

(१) ६२२ पत्वे वार्त्तिकसूत्रमिदमनुसन्धेयम्।

(२) द्वयहीन इति विषयद्विगुनिष्पादितत्वात् सख्यहोरात्र इत्यनेनेति शेषः।

(३) सर्व्वैकदेशेत्यादिसूत्रे षपरे एवाङ्कादेश इत्युक्तेः।

(४) ६०२ पत्वे वार्त्तिकसूत्रमन्वेषणीयम्।

दौवारिकः सौवरं सौवं सौवस्तिकः सौवादुमृदवं वैयल्कसं शौवं शौवनं स्फैयङ्कृतं सौवं सौवाध्यायिकं सौवग्रामिकं नैयग्रोधम्। एकेति किं न्याग्रोधमूलिकम्। शौवापदं श्वापदं, नैयङ्कवं न्याङ्कवम्। श्वागणिकम्।

द्वारस्वरेत्यादिसूत्रस्योदाहरणमाह दौवारिक इत्यादि— द्वारे नियुक्त इत्यर्थे ष्णिके वस्य उम् पश्चादुत्रिः। स्वरमधिकृत्य कृतो ग्रन्थः सौवरः। स्वः स्वर्गे भवं सौवं, ष्णे व्यटेरिति टेर्लोपः। स्वस्ति वक्ष्यति सौवस्तिकः, स्वस्ति यथा स्यात्तथा वक्ति सौवस्तिकः, प्रभूतादित्वात् ष्णिक इत्यन्ये। स्वादुमृदुनि संस्कृतं सौवादुमृदवं भक्तं, संस्कृते भक्ष्येऽर्थे वेत्यादित्वात् ष्णः। व्यल्कसोऽव्युत्पन्नस्तत्र भवः वैयल्कसः। अन्ये द्वारादौ न पठन्ति, तेषां मते विगतोऽर्को व्यर्कस्तं स्यति व्यर्कसः, कपिलिकादित्वात् रस्य लः, तत्र भवः वैयल्कस इति आद्यचः स्थानजातत्वात् यस्य इम् पश्चाद् त्रिः। श्वो भवं शौवस्तिकम्, अत्र शौवमिति पाठो लिपिकरप्रमादः। कालवाचित्वात्(१) ष्णिकः तस्य तम्(२)। तथाच शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मादिति भट्टिः। शुनि भवं शौवनं मांसम्, अविकारेणे नलोपाभावः। स्फ्यकृते भवं स्फैयङ्कृतं, स्फ्यः खादिरः खड्गस्तेन कृतमिति त्रीसः। स्वे धने भवं सौवं, स्वपरदेवराजजनस्येत्यत्र (३) आत्मार्थस्वशब्दस्य ग्रहणात् इह स्वस्य

---

(१) श्वः परदिने भवमित्यर्थकत्वात्।

(२) तस्य ष्णिकस्यादौ तकारागमः। ६१० पत्रे वार्त्तिकसूत्रमन्वेष्टव्यम्।

(३) ५६६ पत्रे स्वपरदेवराजेत्यादिवार्त्तिकसूत्रेण स्वकीय इत्येव भवति कथमत्र सौवमित्याशङ्क्याह आत्मार्थेत्यादि।

धनार्थत्वम् । वामनधर्म्मदासौ तु आत्मार्थस्वशब्दस्यापि इदमर्थे सौवमित्यप्याहतुः । स्वाध्याये भवं सौवाध्यायिकं वेदाध्ययनं, स्वग्रामे भवं सौवग्रामिकम्, आभ्यामध्यात्मादित्वात् ष्णिकः । यद्यपि स्वाध्यायस्वग्रामशब्दयोः स्वशब्दस्य ग्रहणेनैव सिद्धिस्तथापि अन्यादिस्थितस्वशब्दस्य न स्यादित्येतदर्थं पृथगनयोर्ग्रहणम् (१)। दुर्गटीकायान्तु स्वग्राम इत्यत्र स्वर्गमनमित्युक्त्या स्वर्गमनं वक्तीत्यर्थे सौवर्गमनिक इति वर्त्तते । न्यग्रोधे जातः नैयग्रोधश्चमसः (२)। न्यग्रोधमूलिकमिति—न्यग्रोधमूलेन संसृष्टम् इत्यर्थे ष्णिकः । शुन इव पदमस्य श्वापदः, शुनो दन्तादाविति र्घः, तत्र भवं शौवापदं, पक्षे श्वापदमिति, पलदादेराकृतिगणत्वात् ष्णः, अथवा क्वचिदपवादविषये उत्सर्गोऽभिनिविशते इति न्यायात् ष्णः । नड्वलौ भवं नैयङ्क्षवं न्याङ्क्षवम् (३)। श्वागणिकमिति—श्वगणेन चरति, श्वगणाद्वेति षिकण्णिकौ, ण्णिकपक्षे इकारादौ ण्णित्ते न वस्य उम् । इकारादिभिन्ने तु श्वादंष्ट्रायां भवः शौवादंष्ट्रः इत्यादौ स्यादेव । अत्रापि शुनो दन्तादाविति र्घः । अत्र श्वादेः श्वपूर्व्वस्यैव इकारादौ ते वस्य उम्निषेधात् द्वारादीनां सर्व्वेषां ण्णित्ते सामान्यवयो(४)रिमुमौ स्यातामित्यर्थः । अतएव न्यग्रोधस्यैकेति विशेषणस्य सार्थकत्वमिति ।

---

(१) तेन खोदरं पूरयतीति खौदरिक इत्यादि सिद्धम् ।

(२) न्यग्रोधो वटवृक्षः, चमसो यज्ञपात्रविशेषः ।

(३) नड्वलमृगविशेषः ।

(४) पदान्तस्थितभिन्नयोरादयवः स्याने अजादयवोरपीत्यर्थः ।

४३४ । विकार सङ्घभावेदं हित स्वार्थादौ ।

(विकार—स्वार्थादौ ७।) ।

एष्वर्थेषु च ते त्याः स्युः ।

---

४३४ । विकारश्च सङ्घश्च भावश्च इदञ्च हितञ्च स्वार्थश्च ते आदयो यस्य स तस्मिन् । आदिशब्दः प्रत्येकमभिसम्बध्यते इन्द्वोत्तरश्रुतत्वात् । प्रकृतेरवस्थान्तरं विकारः । सङ्घः समूहः । शब्दस्य प्रवृत्तिनिमित्तं भावः । इदमिति सम्बन्धमात्रोपलक्षणम् । हितमिष्टसाधनम् । स्वार्थः प्रकृत्यर्थानतिरेकः । ते त्याः स्युरिति—ष्ण ष्णेय ष्णञ ष्णायन णीय ष्णिक ष्ण ष्णीक कण् णीन इय एते । सेतोऽनितश्चेति अभिधानात् ज्ञातव्या इत्यर्थः ।

ष्याः । ष्या इत्यधिकारः प्राग्याः प्राक् ।

विकारे । ष्यन्ताद्विकारेऽर्थे वेत्यादित्वात् ष्णः स्यात् । मृत्तिकाया विकारः मार्त्तिकः आश्मः प्रासादः । नञा निर्दिष्टस्यानित्यत्वात् आश्मन इति कश्चित् । तथाच—"यश्चापमाश्मनप्रख्यं मेषुं धत्तेऽन्यदुर्व्वह"मिति भट्टिः । अस्मन्मते तु इदमर्थे भविष्यति ।

प्राण्योषधिवृक्षेभ्योऽवयवे च । ष्यन्तेभ्य एभ्यो विकारेऽवयवे चार्थे वेत्यादित्वात् ष्णः स्यात् । प्राणिभ्यष्ट्णो वक्ष्यते, तच्चैवोदाहार्य्यम् । इह प्राणिग्रहणन्तु अतः परे ये त्या वक्तव्यास्ते प्राण्योषधिवृक्षेभ्यो विकारावयवयोरन्येभ्यो विकारमात्रे भवन्तीति ज्ञापनार्थम् । ओषधिभ्यस्तावत्—मूर्व्वाया विकारोऽवयवो वा मौर्व्वः, एवं दौर्व्वः । वृक्षेभ्यस्तावत्—पलाशस्य विकारोऽवयवो

हेम्नो विकारः हैमः आप्य आग्नेयः, भिक्षाणां समूहः भैक्षं आङ्कं गाणिक्यं राजकं, गुरोर्भावः गौरवं यौवनं साम्यं वैरूप्यं राज्यं सौहार्दं, विष्णोरिदं वैष्णवं त्वदीयं माधवनं शौवनम्।

वा पालाशः, शिंशपाया विकारोऽवयवो वा शांशपः, इकारस्याकारः।

उ-प्राणि-रजतादिभ्यष्ट्णः। ष्यन्तात् उवर्णान्तात् प्राणिवाचकाद्रजतादेश्च ट्णः स्यात् विकारावयवयोः। देवदारोर्विकारोऽवयवो वा दैवदारवः, प्रैयङ्गवः, कपोतस्य विकारोऽवयवो वा कापोतः, मायूरः, शुनो विकारोऽवयवो वा शौवं मांसं, रजतस्य विकारोऽवयवो वा राजतं कुण्डलं, काञ्चनं, तथाच—"पुरीं द्रक्ष्यथ काञ्चनी"मिति भट्टिः। "काञ्चनी वासयष्टि"रिति कालिदासः। परशव्यस्य विकारोऽवयवो वा पारशवः, विकारत्वे हितार्थत्वस्य लुक् वक्ष्यते (१)। रजतादिर्यथा—

रजतं काञ्चनं लोहं सीसं रोहितकस्तथा।
उदुम्बरः पीतदारु त्रिकण्टक-विभीतकाः।
कण्टकारो नीप-दारु-परशव्योऽत्र कीर्त्तितः॥

अनुदात्तादेः। ष्यन्तादनुदात्तादेर्विकारेऽवयवे चार्थे ट्णः स्यात्। दण्डिनो विकारोऽवयवो वा दाण्डः, दाधित्थः, कापित्थः।

पलाशादेर्वा। ष्यन्तात् पलाशादेस्तयोष्ट्णो वा स्यात्। पालाशः, पक्षे षणः—पालाशः, पालाशस्य विकारः पालाशमयः।

---

(१) परशव्यशब्दो हि परशुशब्दात् हितार्थे य-प्रत्यय-निष्पादितः।

irukta, (2nd Edition) Vol. I. Fasc. 1 @ Rs. 1-4 ...	Rs.	1	4
Nyāyavārtika, Fasc. 2–6 @ /10/ each		3	2
ityācārapaddhatiḥ, Fasc. 1–7 @ /10/ each		4	6
ityācāraparadīpa Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1-4. @ /10/ each ...		7	8
yayabindutīkā, Fasc. 1 @ /10/ each		0	10
Nyāya Kusumāñjali Prakaraṇa Vol. II, Fasc.1–3 @ /10/ each ...		1	14
yaya Vartika Tatparya Parisudhi, Fasc. 1-2 @ /10/ each		1	4
yayasarah		2	0
adumawati. Fasc. 1–6 @ 2/ each		10	0
rākrita-Paingalam, Fasc. 1–7 @ /10/ each		4	6
arāçara Smṛti, Vol. I, Fasc. 2-8; Vol. II, Fasc. 1–6 ; Vol. III, Fasc. 1–6 @ /10/ each		11	14
arāçara, Institutes of (English) @ 1/- each		1	0
ariksamukha Sutram		1	0
rabandhacintāmaṇi (English) Fasc. 1–3 @ 1/4/ each		3	12
asarnavam, Fasc. 1-3		3	12
arisiddhanta Manjari, Fasc. 1		0	10
addarsana-Samuccaya, Fasc. 1-2 @ /10/ each		1	4
amaraicca Kaha Fasc. 1-5, @ /10/ each		3	2
āṅkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each		2	8
Ditto (English) Fasc. 1–3 @ 1/- each		3	0
ix Buddhist Nyaya Tracts.		0	10
rāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		3	12
uçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each		1	0
addhikaumudī, Fasc. 1-4 @ /10/ each		2	8
ndaranandam Kavyam		1	0
ryya Siddhanta. Fasc. 1-2 @ 1-4 each		2	8
aiuika Sastra		1	0
Taittreya Brahmana, Fasc. 11-25 @ /10/ each		9	6
Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each		11	14
āṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each		6	4
antra Vārteka (English) Fasc. 1-10 @ 1/4/ each		12	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 2 10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each		23	12
attva Cintamani Didhiti Vivriti, Vol. I, Fasc, 1-6; Vol. II, Fc, 1, @ /10/ each		4	6
attva Cintamani Didhiti Prakas, Fasc. 1-5, @ /10/ each		3	2
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each		1	14
irthacintamoni, Fasc, 1-3, @ /10/ each		1	14
rikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each		1	14
ul'si Satsai, Fasc. 1–5 @ /10/ each		3	2
Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each		6	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ 1/- each		6	0
Vallāla Carita, Fasc 1 @ /10/		0	10
Varṣa Kriyā Kaumudī, Fasc 1–6 @ /10/ each		3	12
Vāyu Purāṇa, Vol. I, Fasc. 3–6 : Vol. II, Fasc. 1–7, @ /10/ each ...		6	14
Vidhāna Pārijata, Fasc. 1–8 Vol- II. Fasc. I @ /10/ each		5	10
Ditto Vol. II, Fasc. 2-5 @ 1/4/		3	0
Vivādaratnākara, Fasc. 1–7 @ /10/ each		4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1–6 @ /10/ each		3	12
Yogasāstra Fasc. 1-3		3	12

Tibetan Series.

Amarkosha		2	0
Baudhastotrasangraha, Vol. I		2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1–4 @ 1/- each		4	0
Nyayabindu of Dharmakirti Fasc. 1		1	0
Pag-Sam S'hi Ti. Fasc. 1–4 @ 1- each		4	0
Rtogs *brjod dpag bkhi* S'hi ; Tib. & Sans. Avadāna Kalpalatā Vol. I, Fasc. 1–10 : Vol. II. Fasc. 1–10 @ 1/- each		20	
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each		14	

Arabic and Persian Series.

Amal-i-Salih, or Shah Jahan Namah			
Al-Muqaddasi (English) Vol. I, Fasc. 1–4 @ 1/- each			
Ain-i-Akbari, Fasc. 2–5 @ 1/- each			

Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each ... ... Rs. 3
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each 31
Faras Nama, of Hashini 1
Ditto of Zabardast Khan 1
Farnang-i-Rashīdi, Fasc. 1–14 @ 1/8/ each 21
Fihrist-i-Ṭūsi. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ... 4
Gulriz 2
Hadiqatu'L. Haqiqat, (Text & Eng.) 3
History of Gujarat 1
Haft Asmān, History of the Persian Masnawi. Fasc. 1 @ /12/ each ... 0
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each 7
Iqālnamah-i-Jahāngirī, Fasc. 1--3 @ /10/ each 1
Iṣābah, with Supplement, 51 Fasc. @ 1/- each 51
Ma'āṣir-i-Rahīmī, Part I, Fasc. 1--8 @ 2/ each 6
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each 35
Ditto (Eng) Vol. I, Fasc. 1--2, @ 1/4/ each 2
Memoirs of Tahmasp 1
Marhamu 'L-Ilali 'L-Mu'Dila Fasc. 1--2 2
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each 9
Ditto (English) Vol. I, Fasc. 1--7 : Vol. II. Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each ... 16
Muntakhabu-l-Lubāb, Fasc. 1–19 @ /10/ each 11
Ditto Part 3, Fasc. 1--2 @ 1/- each 1
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ 0
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each 1
Persian and Turki Divans of Bayran Khan, Khan Khanan 1
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott 5
Riyāzu-s-Salātīn, Fasc. 1--5 @ /10/ each 3
Ditto (English) Fasc. 1--5 @ 1/ 5
Shah Alam Nama 1
Taḍhkira-i-khushnavīsān 1
Tubaquāt-i-Nāṣiri, (English), Fasc. 1-14 @ 1/- each 14
Ditto Index 1
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1--7 @ /10/ each ... 4
Tārīkh-i-Fīrūzshāhi. of Shams-i-Sirāi Aif. Fasc. 1--6 @ /10/ each ... 3
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each 3
The Mabani 'L Lughat : A Grammar of the Turki Language in Persian 1
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1 @ 1/ 1
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each 3
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc 1--8 @ /10/ each 10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XX @ 10/ each 20
2. Proceedings of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No.
3. Journal of the Asiatic Society for 1875 (8), 1871 (7). 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6). 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890-(11), 1891 (7). 1892 (8). 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7). 1901 (7), 1902 (9). 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905. to date. (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905. to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, ... 18